वर्षम् – ७१
अङ्कः – ९
आषाढ़मासः
विक्रमाब्दः २०७८
युगाब्दः ५१२३
जुलाई, २०२१


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख



आषाढी पूर्णिमा व्यासपूर्णिमा गुरुपूर्णिमा।
प्रणमामो वयं शिष्यान् पाठयन्तं गुरुं मुनिम्॥

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | रामो विग्रहवान् धर्मः | प्रो. सोहनलालशर्मा | ५ |
| ३ | आत्मकल्याणमार्गः क्रियायोगः | डॉ. दिवाकरमिश्रः | १४ |
| ४ | धर्मो हि मम जीवनम् | पं. नथमलशास्त्रीदाधीचः | १८ |
| ५ | मूल्यशिक्षादृष्ट्या पुरुषार्थानां मीमांसा | डॉ. कुलदीपसिंहः | २० |
| ६ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २७ |
| ७ | परिवारयोजनमतीव दुष्करम् | सौ. आराधना धर्माधिकारी | २८ |
| ८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| ९ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9783105699

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षका:
श्रीश्यामशरणदेवाचार्य:
( निम्बार्कपीठं सलेमाबाद: )
स्वामी रामभद्राचार्य:
( चित्रकूट: )
स्वामी अवधेशानन्दगिरि:
( हरिद्वारम् )
महन्त: गोविन्ददेवगिरि:
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरि:
( बीकानेरम् )
महन्त: प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादक:
देवर्षिकलानाथशास्त्री

सम्पादक:
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादक:
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादक:
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्ष:
प्रोफेसर शङ्करप्रसादशुक्ल:

उपाध्यक्षौ
डॉ. नाथूलालसुमन:
डॉ. नन्दसिंहनरूका:

सचिव:
डॉ. सुधीरकुमारशर्मा

सहसचिव:
कृष्णकुमारशर्मा

व्यवस्थापक:
राजीवदाधीच:
9352030291

कार्यालय:
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्क: -9
आषाढमास:
विक्रमाब्द: 2078
युगाब्द: 5123
जुलाई , 2021

एकस्या: प्रते: 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# गुरुश्छत्रम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

**अज्ञानमितिरान्धस्य ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।**

गृणाति=उपदिशति वेदशास्त्रादिविद्यामिति व्युत्पत्तौ 'गृ' शब्दे-इत्यस्माद् धातोः, गिरति = अज्ञानम् अन्तर्यामिरूपेणाविद्यां, नाशयतीति व्युत्पत्तौ 'गृ' निगरणे इत्यस्माद् धातोर्वा 'कृग्रोरुच्च' इत्युणादिसूत्रेण उप्रत्यय उकारान्तादेशश्च, 'उरण् रपरः' इति रपरत्वे 'गुरु' शब्दो निष्पद्यते। पुरा काले गुरु-शिष्यौ विद्यासम्बन्धेन सम्बद्धावास्ताम्, 'विद्या-योनि-सम्बन्धेभ्यो वुञ्' (पा. 4.3.77) इति पाणिनिवचनात्। सम्बन्धोऽयं योनि-सम्बन्धवत् पवित्र आसीत्। अतश्चोक्तं भट्टोजिदीक्षितेन-'वंशो द्विधा, विद्यया जन्मना चे'ति।

गुरोः सकाशमध्येतुः '**छात्र**' सञ्ज्ञाऽऽसीत्। छत्रं शीलमस्येत्यर्थे 'छत्रादिभ्यो णः' (पा.4.4.62) इति सूत्रेण 'ण' प्रत्यये सति '**छात्र**' शब्दो निष्पद्यते। 'छत्रं शीलमस्ये' ति विग्रहे यद्यपि यो जनो राज्ञश्छत्रं धारयति राजपुरुषादिः, सोऽपि 'छात्र' शब्दाभिधेयो भवेत्, तस्यापि छत्रशीलत्वात्। अतो **महाभाष्यकारः** शङ्कामिमामपाकरोति- 'उत्तरपदलोपोऽत्र द्रष्टव्यः' छत्रमिवच्छत्रम्। अत्र 'इव' शब्दस्य लोपो द्रष्टव्यः। **गुरुश्छत्रम्**। गुरुणा शिष्यश्छत्रवच्छाद्यः' इति। शिष्येण च गुरुश्च्छत्रवत् परिपाल्यः।

अत्रैव महाभाष्ये प्रदीपटीकाकारः **कैयटो** लिखति- 'छत्रमिवच्छत्रम्' इत्यत्र गौणी वृत्तिश्छत्रशब्दस्याश्रयणीया। अज्ञानं शिष्यस्य छादयति = निवर्त्तयति यतस्तत्र छत्रम्, अतो गुरुश्छत्रम्। छत्रं शीलमस्येति छात्रः इति। अत्रोद्द्योतकारो **भट्टनागेशः** स्पष्टयति- 'यथा छत्रम् उष्णादि निवर्त्तयति, एवमज्ञानं गुरुर्निवर्तयति, तत् सदृशत्वाद् **गुरुश्छत्रम्**' इति।

**तैत्तिरीयोपनिषदि** आचार्य उपदिशति- 'यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि' इति। इममेवाशयं सिद्धान्तकौमुदीकारोऽपि प्रकाशयति छात्रशब्दनिर्वचने - 'गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्येति छात्रः' इति। शीलं = स्वभावः। छत्रस्य शीलत्वानुपपत्तेः गुरुदोषावरणे गौणमिति **तत्त्वबोधिनीकारः**।

अनेनेदं विज्ञातम्भवति यच्छात्रशब्दस्य मूले कल्पनेयं समुधराऽऽसीद् यद् गुरोर्जीवने सः शिष्यः छत्रवत् व्याप्त आसीत् गुरुरपि छात्रजीवने छत्रवत् सदा कष्टनिवारक आसीत्। यथा गुरुश्छत्रमिव शिष्यम् अज्ञानातपाद् रक्षति तथैव छात्रोऽपि छत्रदण्डं गृहीत्वा सदा सर्वदा गुर्वनुशासनं पालयति। 'दण्ड' पदमत्र 'आज्ञापालने' गौणम्। अतः **काशिकाकारो** वदति - 'छादनाद् = आवरणाच्छत्रम्। गुरुकार्येषु अवहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः' इति।

इत्थं शिष्यो गुरुं प्रति जागरूकः सन् स्वकर्त्तव्य-पालनाय ऊर्जां प्राप्नोति स्म। (छदिर् ऊर्जने धातुः)। स गुरोर्मानवसहजात-त्रुटिषु मनोऽपनीय स्वकीयाम् ऊर्जां न क्षाययति स्म। गुरु-शिष्ययोः साक्षात् सम्बन्धेनैव शिष्योऽन्तेवासीति कथ्यतेस्म।

**व्याकरणपीठाध्यक्षचरः, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**
**दूरभाषाङ्काः 8386943655**

# रामो विग्रहवान् धर्मः

## ( श्रीमद्वाल्मीकीयरामायणानुसारम् )

❑ प्रो. सोहनलालशर्मा

**अथ को नाम धर्म-इति जिज्ञासायां-यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, चोदना-लक्षणो धर्मः, यमार्याः क्रियमाणं प्रशंसन्ति स धर्मः, यः स्याद् धारणसंयुक्तः स धर्मः, वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मन-इति-चतुर्विध-लक्षणात्मकः स धर्मः, आत्मनः प्रतिकूलानि परेषां न समाचरेत्-स धर्मः, इज्याध्ययनदानानीति कृत्वा धर्मस्याष्टविधो यः मार्गः प्रोक्तः- स धर्मः, इत्याद्याः परिभाषाः, किञ्च ''धर्मो विश्वस्य जगतः प्रतिष्ठा'' ''यतो धर्मस्ततो जयः'' ''धर्मो रक्षति रक्षितः'' ''सत्यान्नास्ति परो धर्म''** इत्याद्याः सूक्तयश्चापि श्रूयन्ते।

सत्यं हि धर्मस्य तत्त्वमतीव गूढम्, कथितञ्च-**''धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः।''** पूर्वैः सद्भिराचरितः यः मार्ग स एव धर्मस्य मार्गः।

सम्प्रति वाल्मीकीयरामयणास्योत्तरकाण्डस्य प्रक्षिप्ते द्वितीये सर्गे अयोध्यायां राजद्वारे समागतस्य सारमेयस्य वचनेषु धर्ममन्विष्यामः। सारमेयः श्रीराममब्रवीत्-

**''धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।**
**यस्माद् धारयते सर्वं त्रैलोक्यं सचराचरम्।। 7।।''**

**''धारणाद् विद्विषां चैव धर्मेणारञ्जयन् प्रजाः।**
**तस्माद् धारणमित्युक्तं स धर्म इति निश्चयः।। 8।।''**

राजन्! एष एव धर्मः। अर्थात् किञ्चिद् दुष्प्रापं न हि भवेदिति मे मतिः।

श्रीरामस्य राज्याभिषेकप्रस्तावसमये ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह समेत्य रामं युवराजपदे-भिसिञ्चष्व पार्थिवमिति (अयो. 2/21) दशरथमूचुः। महात्मानः नृपाश्चापि श्रीरामस्य गुणवर्णनप्रसङ्गेऽभाषन्त-

**''रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।**
**साक्षाद् रामाद् विनिर्वृत्तो धर्मश्चापि श्रिया सह।।''**

(अयो. 02/29)

श्रीरामः साक्षात् धर्म इवापरः न, अपितु धर्म एव श्रिया सह साक्षाद् रामात् प्रतिष्ठापितः।

**''रामो विग्रहवान् धर्मः।''** विपरीतधर्मा राक्षसः मारीचोऽपि श्रीराममेवमशंसत्-जगाद च रावणम्-सीतापहरणात् विगर्हितात् कर्मणः रावणं विनिवारयन् मारीचस्तमवदत्-शृणु, एकदा हस्तिसहस्रं बलं धारयन् प्लवगोपमोऽहं दण्डकावनं व्यचरन् महर्षेः विश्वामित्रस्य वेदीमभ्यधावम्-परं रामशरेण ताडितः शतयोजनं दूरं समुद्रे क्षिप्तः। अद्याप्यहं भीतः गृहीतधनुषं पाशहस्त-मिवान्तकं रामं सर्वत्र पश्यामि। यदि त्वं सीतापहरणं करिष्यसि चेत् तवापराधात् सर्वेषां राक्षसानां लङ्कायाश्च सर्वनाशो भविष्यति। रामस्तु सर्वभूतहिते रतः कैकेय्याः दशरथस्य च प्रियकार्यार्थं वनमागतः। स तु **''न रामः कर्कशस्तात नाविद्वान् नाजितेन्द्रियः।''**(अरण्य 37/2)

**''रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिह वासवः।।''**

(अरण्य 37/3)

पितुः मातुश्च वश्यता धर्मः- धर्मकामार्थतत्त्वः, ''रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता'' (बाल. 01/14), इक्ष्वाकुवंशप्रभवस्य, चक्रवर्तिनः, सम्राजः

दशरथस्य च ज्येष्ठः प्रियतरः सुतः जटाचीरधरेण चतुर्दशवर्षाणि यावत् त्वयाऽरण्यं प्रवेष्टव्यं, राज्यपदे च भरतस्याभिषेकः स्यादिति कैकेय्याः दारुणं परं वचनं श्रुत्वा गतव्यथः श्रीरामः कैकेयीमिदमब्रवीत्-

**''नाहमर्थपरो देवि लोकमावस्तुमुत्सहे।**
**विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितम्।।''**

(अयो. 19/20)

स पुनश्चाकथयत्-पितृशुश्रूषां विहाय नास्त्यपरः महत्तरः धर्मः-

**''न ह्यतो धर्मचरणं किञ्चिदस्ति महत्तरम्।**
**यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।''**

(अयो. 19/22)

अहमद्यैव दण्डकारण्ये गमिष्यामि। भवत्या कर्तव्यं च-

**''भरतः पालयेद् राज्यं शुश्रूषेच्च पितुर्यथा।**
**तथा भवत्या कर्तव्यं स हि धर्मः सनातनः।।''**

(अयो. 19/26)

श्रीरामस्य वनवासं भरतस्य राज्याभिषेकं श्रुत्वा लक्ष्मणः विलपन्तीं कौसल्यामुवाच - अत्र श्रीरामस्यापराधः दोषश्च न दृश्यते तर्हि कथं स राष्ट्राद् निर्वास्यते। आर्ये स तु देवकल्पः, दान्तः रिपूणामपि वत्सलः। एतादृशं नरमपि शत्रुं वा मित्रं वा न पश्यामि योऽस्य दोषं वदेत्। अहमद्यैवायोध्यां निर्मानुषां करिष्यामि। भरतस्य हितैषिणं पक्ष्यं चापि वधिष्यामि। देवि! त्वं च राघवश्च मे पराक्रमं पश्यतु अहमद्य **''हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम्।''** (अयोध्या 21/19)। लक्ष्मणस्यैतत् परुषं वचनं श्रुत्वा रुदती कौसल्या श्रीराममुवाच - किं ते भ्रातुः लक्ष्मणस्य वचः श्रुतम्? शोकसन्तप्तां मां विहाय कथं त्वं वनं गन्तुमर्हसि? त्वमत्रैव स्थितः मां शुश्रूषस्व, धर्मं चर। त्वयि वनं गते नाहं जीवितुं शक्ष्यामि। ततश्च धर्मात्मा श्रीरामः मातरमवदत्- **''नास्ति शक्तिर्पितुर्वाक्यं समतिक्रमितुं मम।''** (अयो. 21/30)। अहं वनं गन्तुमिच्छामि। मया च- **पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते।** (अयो 21/36)। जननीमेवमुक्त्वा श्रीरामः लक्ष्मणं जगाद- तवानुत्तमं स्नेहं मयि-जानामि। तव विक्रमं, धैर्यं दुर्धर्षं तेजश्चाहं जानामि। संसारे धर्म एव सर्वश्रेष्ठः, सत्यस्य प्रतिष्ठा धर्मे एव-

**''धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।**
**धर्मसंश्रितमप्येतत् पितुर्वचनमुत्तमम्।।''**

(अयो. 21/41)

**पितुर्वचनमपि धर्माश्रितमत एवोक्तम्-** धर्ममाश्रित्य तिष्ठता पुरुषेण मातुः पितुः ब्राह्मस्य च वचः संश्रुत्य वृथा न कर्तव्यम्। अतो वीर, ''धर्ममाश्रय, मा तैक्ष्ण्यं, मद्बुद्धिरनुगम्यताम्'' (अयो. 21/44)। राघवः प्राञ्जलिः शिरसा नतः पुनः मातरमुवाच - वनं गन्तुमनुमन्यस्व, पितुर्वचनं कृत्वा वनात् पुनरत्रैवा-गमिष्यामि, मातः, हृदि शोकः संधार्यतां, शोकं मा कुरु। त्वया मया च वैदेह्या, लक्ष्मणेन सुमित्रया च **''पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः।''** (अयो. 21/49)। ''अहं त्वामनुगमिष्यामि मातरि चोक्ते श्रीरामः पुनरब्रवीत्- भर्तुः परित्यागः मनसाऽपि न कर्तव्यः। त्वया तु मम पितुः सेवा कर्तव्या''-

**''यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः।**
**शुश्रूषा क्रियतां तावत् स हि धर्मः सनातनः।''**

(अयो. 21/49)

रुदतीं कौसल्यां दृष्ट्वा रामोऽपि रुदन् वचनमब्रवीत्- **''जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च''** (अयो. 24/21)। अतः भवत्या मया च पितुर्वचनं पालनीयम्।

साकं वनं गन्तुकामां सीतां कान्तारं बहुदोषकरमिति कथयित्वा श्रीरामः पितुः, कौसल्यायास्तथान्यासामपि

मातृणामयोध्यायामेव स्थित्वा स्नेहप्रणयादिभिः सेवार्थमवदत्। भरतशत्रुघ्नौ मम प्राणैः प्रियतरौ त्वया भ्रातृपुत्रसमौ द्रष्टव्यौ। त्वया-

**''विप्रियं न च कर्तव्यं भरतस्य कदाचन।**
**स हि राजा च वैदेहि देशस्य च कुलस्य च।।''**

अतस्त्वं कल्याणि! भरतस्य समनुवर्तिनी भूत्वाऽत्रैव वस। अरण्यवासः मह्यमपि न रोचते तथापि पुरा सद्भिराचरितं धर्ममार्गमेवाहमनुवर्तिष्ये। पितुः सत्योपबृं-हितं वचनं मां वनं नयति। पितुः मातुश्चाज्ञापालनं धर्मः, धर्मस्योल्लङ्घनेन जीवने नोत्साहः-

**''एष धर्मश्च सुश्रोणि पितुर्मातुश्च वश्यता।**
**आज्ञां चाहं व्यतिक्रम्य नहि जीवितुमुत्सहे।।''**

(अयो. 30/32)

श्रीरामः पुनश्चावदत्-सीते, सत्यं, दानमानौ, यज्ञश्चाप्तदक्षिणः- पितुः सेवातो नाधिकाः बलवत्तराः। **''गुरुवृत्त्यनुरोधेन न किञ्चिदपि दुर्लभम्।''** (अयो. 30/36) अहमिच्छामि-

**''स मां पिता यथा शास्ति सत्यधर्मपथे स्थितः।**
**तथा वर्तितुमिच्छामि स हि धर्मः सनातनः।।''**

(अयो. 30/38)

पिता दशरथः पुत्रः श्रीरामः द्वावेव शपथेनाब्रुवाताम्। दशरथ उवाच - पुत्र, तव वनगमनं न मे प्रियमहं सत्येन शपे, एवमार्तस्य पितुः भाषितं श्रुत्वा श्रीरामः दीनः वचनमवोचत्-

**''इयं सराष्ट्रा सजना धनधान्यसमाकुला।**
**मया विसृष्टा वसुधा भरताय प्रदीयताम्।।''**

(अयो. 34/41)

अहं राज्यं, सुखं, मेदिनीं, सर्वान् कामान्, स्वर्गं जीवितुञ्चापि नेच्छामि। **''अहं त्वां सत्यमिच्छामि नानृतं पुरुषर्षभ, प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे।।''** हे तात! पिता देवानामपि देवः मतः, अतस्तस्मात् **''दैवतमित्येव करिष्यामि पितुर्वचः।''** (अयो. 34/52)। प्रशंसनीयोऽयं श्रीरामस्य पितुराज्ञापालनं धर्मः।

**प्रजापालनं धर्मः - पितेव** - (क) यदा श्रीरामः लक्ष्मणसहितः संग्रामे विजित्य कुंजरेण रथेन वा पुनरागच्छति तदा यथा पिता स्वौरसान् पुत्रान् कुशलं पृच्छति तथैव सः ''पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति।'' (अयो. 02/38)। स च -

**''व्यसनेषु मनुष्याणां भृशं भवति दुःखितः।''**

(अयो. 02/40)

**''उत्सवेषु च सर्वेषु पितेव परितुष्यति।।''**

(अयो.02/41)

अनुरक्ताः (ख) अनुरक्ताः मानवाः वनं प्रयान्तं श्रीराममनुजग्मुः! श्रीरामः ताः प्रजाः स्वाः प्रजा इव सस्नेहमवदत्- या प्रीतिः बहुमानश्चायोध्यानिवासिनां मयि वर्तते सा प्रीतिः बहुमानश्च भरताय प्रदीयताम्। मयि वनं गते सः न संतप्येद्-मम प्रियचिकीर्षया भवद्भिस्तथा करणीयम्। ज्ञानेन, वयसौजसा वयः प्रकम्पशिरसः वृद्धाः तुरङ्गमान् कथयन्ति- **''निवर्तध्वं न गन्तव्यं हिता भवत भर्तरि।''** (अयो. 45/14)। पुनरपि श्रीरामं वनं गच्छन्तमेव दृष्ट्वा परमसंतप्ताः द्विजास्तमूचुः- रश्मि-संतापितस्य ते स्वैश्छत्रैर्वाजपेयकैः छायां करिष्यामः।

(ग) प्रथमां रात्रिं श्रीरामः तमसा तटे प्रकृतिभिः सहावसत्। प्रातरुत्थाय लक्ष्मणमब्रवीत् लक्ष्मण, अस्मद् व्यपेक्षान् गृहेषु निर्व्यपेक्षान् वृक्षमूलेषु संसक्तानेतान् पौरान् पश्य। एते प्राणान् न्यसिष्यन्ति परं निश्चयं न त्यक्ष्यन्ति (अयो.46/20)। पौराश्चास्माकं दुःखेन दुःखिताः नस्युः-

**''पौरा ह्यात्मकृताद् दुःखाद् विप्रमोच्या नृपात्मजैः।**
**न तु खल्वात्मना योज्या दुःखेन पुरवासिनः।।''**

(अयो. 46/34)

**राघवस्यैतद् वचनं श्रुत्वा**- ''अब्रवील्लक्ष्मणो रामं साक्षाद् धर्ममिव स्थितं, रोचते मे तथेति।'' प्रभाते श्रीराममपश्यन्तः शोकोपहतचेतनाः पौराः दुःखिताः कथयन्ति स्म-रामः कथमस्मान् विहाय वनं गतः-

**''यो नः सदा पालयति पिता पुत्रानिवौरसान्।**
**कथं रघूणां स श्रेष्ठस्त्यक्त्वा नो विपिनं गतः।।''**

(अयो.47/06)

तेऽतीव दुःखिता अब्रुवन्-

**''इहैव निधनं याम महाप्रस्थानमेव वा।**
**रामेण रहितानां नो किमर्थं जीवितं हितम्''**

(अयो. 47/07)

सर्वेऽयोध्यामगमन्-नगरीं दृष्ट्वा शोकपीडितैः नयनैरब्रुवन्- ''**एषा रामेण रहिता नगरी नातिशोभते।**'' (अयो. 47/17)

**श्रीरामः धर्मे प्रणिहितः** - (घ) शृङ्गवेरपुरे गुहेन भोज्यं, भक्ष्यं, पेयं, लेह्यं, शयनानि खादनं च श्रीरामस्य समक्षमुपस्थापितं, परं श्रीरामः गुहमुवाच-त्वया वयं सर्वदा पूजिताः हृष्टाश्च। स तं भुजाभ्यां पीडयन् वाक्यमब्रवीत्-अपि ते सर्वत्र कुशलम्। प्रीत्या भवता यदुपकल्पितमहम्-

**''न हि वर्ते प्रतिग्रहे'', त्वं मां जानीहि-**

**''कुशचीराजिनधरं फलमूलाशनं च माम्।**
**विद्धि प्रणिहितं धर्मे तापसं वनगोचरम्।।''**

(अयो. 50/44)

(च) श्रीरामः भरद्वाजमपि सीतया लक्ष्मणेन च सह कृताञ्जलिरभ्यवादयत्-

स्वस्य परिचयं दत्वाऽवदत्-

**''पित्रा नियुक्ता भगवन् प्रवेक्ष्यामस्तपोवनम्।**
**धर्ममेवाचरिष्यामस्तत्र मूलफलाशनाः।।''**

(अयो.54/16)

**भ्रातृधर्मः** (1) सैन्यसमुद्धतं शब्दं श्रुत्वा यूथप-महिष-मृगादीनां पलायनं च दृष्ट्वा श्रीरामः कारणं ज्ञातुं लक्ष्मणमादिदेश, ततश्च लक्ष्मणः सालवृक्षमारुह्य कारणं विज्ञाय श्रीरामं वाक्यमभाषत- ''**आवां हन्तुं समभ्येति कैकेय्याः भरतः सुतः।**'' (अयो. 96/17)। अद्याऽहं पूर्वसन्तापकारिणं भरतं ससैन्यं हत्वाऽनृणो भविष्यामि। भरतो वध्य एव, वधे दोषं न पश्यामि। क्रोधमूर्च्छितं लक्ष्मणं परिसान्त्व्य श्रीरामस्तं चेदमब्रवीत्- लक्ष्मण। ''**हत्वा भरतमाहवे सापवादेन राज्येन किं करिष्यामि**'' (अयो. 97/03)। मम सर्वस्वं तु भवन्त एव- ''धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण। इच्छामि भवतामर्थे एतत् प्रतिशृणोमि ते।।'' (अयो. 97/05)

सत्यं वच्मि-भ्रातॄणां सुखार्थं संग्रहार्थमेव राज्यमप्य-हमिच्छामि, परन्त्वधर्मेण ससागरवनाम्बरां महीं शक्रत्वमपि च नहीच्छेयम्। अन्यच्च-

**''यद् विना भरतं त्वां च शत्रुघ्नं वापि मानद।**
**भवेन्मम सुखं किञ्चिद् भस्म तत् कुरुतां शिखी।।''**

(अयो. 97/08)

भरतः सर्वं वृत्तं श्रुत्वाऽस्मान् द्रष्टुमागतः, तथा च प्रसाद्य पितरं श्रीमान् राज्यं मे दातुमागतः (अयो. 97/18)। भरतेन पूर्वं कदापि मे विप्रियं न कृतमतस्त्वया स नाप्रियो वाच्यः। यदि भरतस्याप्रियं भवति, तद् ममाप्यप्रियमेव भविता।

**धर्मपालने दार्ढ्यम्** (2) राज्यं ग्रहीतुं प्रार्थयन्तं भरतं श्रीरामः परिष्वज्येदमब्रवीत्-भरत, त्वयि सूक्ष्ममपि दोषं न पश्यामि। त्वं तु जननीमपि विगर्हितुं नार्हसि। यावत् पितरि गौरवं तावत् जनन्यामपि गौरवम्।। (अयो. 101/21, एतयोः विपरीतमहं कथमन्यत् करिष्यामि।

**''एताभ्यां धर्मशीलाभ्यां वनं गच्छेति राघव।**
**मातापितृभ्यामुक्तोऽहं कथमन्यत् समाचरे।।''**
(अयो. 101/22)

भरतः पुनरप्यवदत् **''इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः''** (अयो.110/36)। अतस्त्वमेव राज्यं गृहाण। यथा कर्षकाः मेघं प्रतीक्षन्ते, तथैवास्माकं ज्ञातयः, योधाः मित्राणि सुहृदश्च त्वामेव प्रतीक्षन्ते- एवमुक्त्वा पादयोः पतितं भरतमङ्के कृत्वा श्रीरामः वचनमब्रवीत्-

**''लक्ष्मीश्चन्द्रादपेयाद् वा हिमवान् वा हिमं त्यजेत्।**
**अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः।।''**
(अयो. 112/18)

सर्वेऽप्येते स्वां मर्यादां लङ्घयन्तु परमहं पितुराज्ञां न त्यक्ष्यामि। त्वयाऽपि पितुराज्ञा पालनीया हि-तथा च-

**''कामाद् वा तात लोभाद् वा मात्रा तुभ्यमिदं कृतम्।**
**न तन्मनसि कर्तव्यं वर्तितव्यं च मातृवत्।।''**
(अयो.112/19)

मात्रा विचार्याविचार्य वा यदुक्तं तन्मनसि न कृत्वा त्वया मातृवदेव वर्तितव्यम्।

**आज्ञापालनम्** (3) श्रीरामस्य हेमभूषिते पादुके शिरसि धृत्वा भरतः प्रजामभाषत-एतयोरुपरि शीघ्रं छत्रं धारयत-

**''छत्रं धारयत क्षिप्रमार्यपादाविमौ मतौ।**
**आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम।।''**
(अयो.115/16)

एते मम गुरोः श्रीरामस्य पादुके-आभ्यामेव राज्ये धर्मस्य स्थितिः। पश्चाच्च भरतः। **''तदधीनस्तदा राज्यं कारयामास सर्वदा।।''** (अयो. 115/26)

**न लक्ष्मणसमो भ्राता ( भ्रातृस्नेहः )** - इन्द्रजित्-शरैः सरुधिरं दीनवदनं निषण्णं भ्रातरं लक्ष्मणं दृष्ट्वाऽऽतुरः श्रीरामः पर्यदेवयद्-मे लब्धया सीतया जीवनेन वा किं कार्यम्। अद्याहं भ्रातरं युधि निर्जितं शयानं पश्यामि। (युद्ध. 49/05)। सीतासदृशी नारी त्वन्या मर्त्यलोके विचिन्वता मिलिष्यति किन्त्वन्यः लक्ष्मणसदृशो भ्राता न भविष्यति -

**''शक्या सीता समा नारी मर्त्यलोके विचिन्वता।**
**न लक्ष्मणसमो भ्राता सचिवः साम्परायिकः।।''**

यदि लक्ष्मणः पञ्चत्वमाप्स्यति चेदहमपि वानराणां तु पश्यताम् **''इहैव देहं त्यक्ष्यामि नहि जीवितुमुत्सहे।''** (अयो. 49/11)। यदि लक्ष्मणं विनायोध्यां यास्यामि चेत्तर्हि मातरं कौसल्यां कैकेयीमम्बां, सुमित्रां भरतं शत्रुघ्नं च किं वक्ष्यामि? **''मया सह वनं यातो विना तेनाहमागतः''** (युद्ध. 49/10) इत्युपालम्भं सोढुं न शक्ष्यामि।

(2) रावणेन क्षिप्तया शक्त्या विभिन्नहृदयं भुवि निपतितं लक्ष्मणं प्रेक्ष्य राघवः भ्रातृस्नेहात् विषण्णहृदयो-ऽभवत्। स **''परं विषादमापन्नो विललापा-कुलेन्द्रियः।''** (युद्ध. 101/10)। लक्ष्मणः यं वनं यान्तमनुयातस्तं तथैवाहमप्यनुयास्यामि। पूर्वजन्मनि मया किं दुष्कर्म कृतं येन मे भ्राता निहतश्चाग्रतः पतितः। कलत्राणि बान्धवाश्च देशे देशे भविष्यन्ति किन्तु सहोदरभ्रातृकं देशं न पश्यामि-

**''देशे देशे कलत्राणि देशे देशे च बान्धवा।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः।।''**
(युद्ध.101/15)

ततश्च महौषधिप्रभावेण विशल्यं विरुजं लक्ष्मणं श्रीरामः परिष्वज्याब्रवीत्-

**''न हि मे जीवितेनार्थः सीतया च जयेन वा।**
**को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते।।''**
(युद्ध.101/49)

अहो, श्रीरामस्य कीदृक् स्नेहप्रस्कन्नं हृदयं, हृदयविदारकः विलापश्च।

**एकपत्नीत्वं धर्मः** - सीताऽपि श्रीरामस्य स्वादारनिरतत्वमशंसत्। सा स्निग्धया वाचा पति-मिदमब्रवीत्-मनुष्येन्द्र! मिथ्यावाक्यं, परदाराभिगमनं, विना वैरेण रौद्रता-त्रीण्येव कामजानि व्यसनानि भवन्ति। मिथ्यावाक्यं न ते भूतं न भविष्यति, परदाराभिगमनमपि त्वयि नास्ति-

**''कुतोऽभिलषणं स्त्रीणां परेषां धर्मनाशनम्।**
**तव नास्ति मनुष्येन्द्र न चाभूत् ते कदाचन।।''**

(अरण्य 9/5)

नित्यमेव त्वं तु स्वदारनिरतः। त्वं तु-

**''धर्मिष्ठः सत्यसन्धश्च पितुर्निदेशकारकः।**
**त्वयि धर्मश्च सत्यं च त्वयि सर्वं प्रतिष्ठितम्।।''**

(आरण्य 9/7)

तृतीयं परप्राणाभिहिंसनं निर्वैरः क्रियते, तच्च ते समुपस्थितं पश्यामि। दण्डकारण्यवासिनामृषीणां रक्षणाय त्वया युद्धे रक्षसां वधः प्रतिज्ञातः। शस्त्रसेवनात् केवलं कृपणपुरुषसदृशी बुद्धिः कलुषा जायते। अयोध्यां गत्वा त्वं क्षात्रधर्मं चरिष्यसि। यदि त्वं राज्यं संन्यस्य मुनिः भवेस्तदैव मम श्वश्रूश्वसुरयोः परमा प्रीतिर्भविष्यति। धर्मेण सर्वं प्राप्यते- जगदिदं धर्मसारभूतम्-

**''धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।**
**धर्मेण लभते सर्वं धर्मसारमिदं जगत्।।''**

(अरण्य 9/30)

त्वं वानप्रस्थोचितैर्नियमैः शरीरं कर्षयित्वा शुचिमति धर्मं चर तपोवने-परन्तु मया तु स्त्रीचापलादेतत् कथितं त्वं तु बुद्ध्या विचार्य यदुचितं तत् कुरु।

**मित्रधर्मः-प्रशंसाऽबोधनञ्च**- (1) श्रीराममग्नि-साक्षिकं मित्रं लब्ध्वा तस्य स्नेहं च दृष्ट्वा सुग्रीवोऽभाषत-

**''आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा।**
**निर्दोषश्च सदोषश्च वयस्यः परमा गतिः।''**

(किष्कि.8/8)

मित्रस्य स्नेहमवलोक्य धनत्यागः सुखत्यागो देहत्यागोऽपि कर्तुं शक्यते-यतः ''सख्युर्नित्यं सखा गतिः।'' (किष्कि. 02/40)। सुग्रीवस्य दुःखं श्रुत्वा श्रीरामः तं प्रहसन्निव प्रत्युवाच ''उपकारफलं मित्रमपकारोऽरिलक्षणमि'ति कथयित्वा बालिवधार्थं समुद्यतोऽभूत्। सोऽवदत् त्वयि विपन्ने हि मम वाक्यं मौढ्यं च ख्यापिते स्यात्-वनेऽस्मिन् त्वमेव शरणम्''

**''अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी।**
**त्वदधीना वयं सर्वे वनेऽस्मिन् शरणं भवान्।।''**

(किष्कि.12/35)

**अतः तस्माद् युध्यस्व भूयस्त्वं मा मा शङ्कीश्च वानर।** (किष्कि. 12/36)

सुग्रीवकृतसैन्यसंग्रहोद्योगं तन्मुखात् श्रुत्वा श्रीरामस्तं परिष्वज्य प्रत्युवाच-सुग्रीव! त्वामहं सततं प्रियवादिनं मित्राणां प्रीतिकर्तारं च जानामि। त्वमेव मम मित्रं, साहाय्यं कर्तुमर्हसि। यद्यपि सुग्रीवस्य ग्राम्यसुखेषु सक्तत्वात् सीतायाः परिमार्गणे कालातीतोऽभवत्-परं श्रीरामः **''वानराणां महत्सैन्यं दृष्ट्वा, सुग्रीवे प्रीतिमानभूत्''** (किष्कि. 38/17)। तं प्रेम्णा च बहुमानाच्च परिष्वज्य ततोऽब्रवीत्- यः राजा धर्ममर्थं कामं च विभज्य समये समये निषेवते स एव राजा, परन्तु-

**''हित्वा धर्मं तथार्थं च कामं यस्तु निषेवेते।**
**स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते।।''**

(किष्कि. 38/21, 22)

त्रिवर्गफलभोक्ता राजा, मित्रसंग्रहकर्ता राजा धर्मेण युज्यते। अतः केवलं कामस्य सेवनं सर्वदा न कार्यम्।

विभीषणः प्रेम्णाऽऽदरेण च श्रीराममुवाच-प्रेष्योऽहं तव। त्वमनेन पुष्पकयानेनायोध्यां यास्यसि। यद्यस्ति मयि सौहृदं तर्हि मयोद्यतां सत्क्रियां ग्रहीष्यसि। श्रुत्वैतत् श्रीरामः प्रत्युवाच-

**''पूजितोऽस्मि त्वया वीर साचिव्येन परेण च।**
**सर्वात्मना च चेष्टाभिः सौहार्देन परेण च।''**

(युद्ध. 121/19)

-एवं श्रीरामः सखायं विभीषणं मुक्तकण्ठेनाशंसीत्।

**शरणागतरक्षा धर्मः**:- रावणेन तिरस्कृतं तं निर्भर्त्स्य रामाश्रयं प्राप्तं विभीषणं प्रति हनुमद्-सुग्रीवादीनां विपरीतमनोभावान् श्रुत्वा श्रीरामः प्रत्यभाषत-

**''मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन।**
**दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्।।''**

(युद्ध.18/03)

विभीषणः किञ्चिदपि ममाहितं कर्तुं न समर्थः, सर्वान् दानवान् पिशाचान्, राक्षसान् यक्षानहमङ्गुल्यग्रेण हन्याम्। परं मित्रभावेन सम्प्राप्तः सदोषोऽपि न त्याज्यः। पुरा परमर्षिणा कण्डुना कथितमेते न हन्तव्याः-

**''बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम्।**
**न हन्यादानृशंस्यार्थमपि शत्रुं परन्तप।।''**

(युद्ध.15/17)

यदि कश्चिदरिः दृप्त आर्तो वा शरणं प्राप्तस्तर्हि कृतात्मना प्राणान् परित्यज्यापि रक्षणीयः, यदि नो चेद्-लोकगर्हितं पापं लभते-

**''स चेद् भयाद् वा मोहाद्वा कामाद् वापि न रक्षति।**
**स्वया शक्त्या यथान्यायं चेत् पापं लोकगर्हितम्।।''**

(युद्ध.18/19)

यदि सः पश्यत एव विनष्टो भवति तदा सः तस्य सुकृतान्यादाय गच्छति-अतोऽहं कण्डोर्वचनं पालयन् शरणागतं विभीषणं रक्षिष्यामि। मम व्रतं तु प्रपन्नानां याचकानामार्तिहरणं रक्षणञ्च-

**''सकृदेव प्रपन्नाय तवास्मीति च याचते।**
**अभयं सर्वभूतभ्यो ददाम्येतत् व्रतं मम।।''**

(युद्ध. 18/33)

मयास्याभयं दत्तमतः विभीषणमानय। यदि सुग्रीवः विभीषणः स्वयं रावणो वा शरणागतो भवेत् सोऽपि रक्षणीय एव-

**''आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया।**
**विभीषणो वा सुग्रीवः यदि वा रावणः स्वयम्।।''**

(युद्ध.18/44)

ततश्च विभीषणोऽपि श्रीराममवोचत- **''भवन्तं सर्वभूतानां शरण्यं शरणं गतः।''** (युद्ध.19/09) तथा च- **''भवद्गतं हि मे राज्यं जीवितं च सुखानि च''** (युद्ध. 19/04)। ब्रुवन्तमेवं विभीषणं श्रीरामः परिष्वज्य समुद्राज्जलमानेतुं लक्ष्मणमब्रवीत्, ततश्च **''एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद् विभीषणम्।''** (युद्ध. 19/26)

**धर्मप्रबोधनम्**- वानरर्क्षरक्षसां स्वदेशे प्रस्थानसमये श्रीरामः विभीषणं प्रेम्णा मधुरया गिराऽभाषत- **''लङ्कां प्रसाधि धर्मेण धर्मज्ञस्त्वं मतो मम''** (आर. 40 /10)

**''मा च बुद्धिमधर्मे त्वं कुर्या राजन् कथंचन।**
**बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम्।।''**

(उत्तर 40/11)। त्वयाऽहं परमया प्रीत्या स्मरणीयः-

**''गच्छ त्वं विगतज्वरः।''** (उत्तर. 40/12)

**प्रजार्थं सीता-परित्यागः**:- पौरैः कथितां सीताविषयकाशुभचर्यां हास्यकारात् भद्रमुखात् श्रुत्वा श्रीरामः सर्वान् भ्रातॄन् समाहूय दीनमना द्वाःस्थं वचनमब्रवीत्-प्रवेशय कुमारान् त्वरितं मत्समीपम्- **''एतेषु जीवितं मह्यमेते प्राणा प्रियाः ममः''** (उत्तर 44/14)। समागतानेतान् परिष्वज्य जगाद वचनम्-

''**भवन्तो मम सर्वस्वं भवन्तो जीवितं मम। भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः**'' (उत्तर 44/19)।

**सर्वे शृणुत**- सीतायाः कृते पौरापवादः श्रूयते बीभत्सा च मे मर्माणि कृन्तति। किं करोमि? अपवादभयात् किमहं जीवितं, युष्मान् सीतां वा जह्याम्? लक्ष्मण! त्वं श्वः प्रभाते सीतां महात्मनः वाल्मीकेराश्रमं विसृज्य शीघ्रमागच्छ- ''**कुरुष्व वचनं मम।**'' (उत्तर 45/19)। सीतायाः परित्यागेन श्रीरामः विरहेणात्यन्तं दुःखितोऽभवत्-किन्तु प्रजापरितोषार्थं स्वसुखमपि परित्यक्तम्। श्लाघनीयोऽयं राजधर्मः।

**सीतया प्रजाधर्माय बोधितः**- लक्ष्मणमुखात् स्वपरित्यागविषयकं दारुणं वचः श्रुत्वा वाष्प-पर्याकुलेक्षणा सीता दीनया वाचा लक्ष्मणमवदत्- ''**मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण**'' (उत्तर. 48.03)। मया किं नु पापं कृतं पूर्वम्? को वा दारैर्वियोजितः? याऽहं शुद्धसमाचारा, सती नृपतिना त्यक्ता। त्वमयोध्यां गत्वा पार्थिवं कथय- राघव! त्वं जानासि सीता तत्त्वेन शुद्धा। समुत्थितोऽयमपवादः मया परिहरणीयः, ''**त्वं हि मे परमा गतिः।**'' (उत्तर. 48/13,14)। राघवस्तु पुनः वक्तव्यः-राजन्! त्वं नृपतिधर्मेण सुसमाहितः सन्-

''**यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा।**
**परमो ह्येष धर्मस्ते तस्मात् कीर्तिरनुत्तमा।।**''
(उत्तर. 48/15)

यथा तव भार्तृषु स्नेहः व्यवहारश्च वर्तते तथैव पौरेष्वपि भवेत्-एतेन परमा कीर्तिर्भविष्यति-ह्येष एव परमो धर्मः। अत्र सीता एवं वियोगजं दुःखं विस्मृत्य प्रजायै भ्रातृवत् स्नेहार्थं व्यवहारार्थं च निवेदनं चकार।

**सारमेयकृता धर्मप्रशंसा**- सारमेयः लक्ष्मण-मिदमब्रवीत्- योनीनामधमोऽहं राजद्वारे प्रवेष्टुं न शक्ष्यामि- यतः ''**धर्मो विग्रहवान् नृपः।**'' राघवः सत्यवादी, सर्वसत्त्वहिते रतः, नीतिकर्ता, सर्वतः समदर्शी च- ''**रामो रमयतां वरः**'' - अतोऽहमनाज्ञप्तः प्रवेष्टुं नेच्छामि। आहूतः सारमेयः राजानं प्राप्याब्रवीद् वचः- ''**राजा सुप्तेषु जागर्ति राजा पालयति प्रजाः।**'' (उत्तर प्रक्षिप्त सर्ग 2/04)।

''**नीत्या सुनीतया राजा धर्मं रक्षति रक्षिता।**'' (उत्तर. प्रक्षिप्त सर्गः 02/05)। ''**न हि धर्मात् भवेत् किञ्चिद् दुष्प्राप्यमिति मे मतिः।**'' (उत्तर. प्रक्षिप्त सर्ग 02/03)

**सारमेयः पुनरवदत्**- राजन् धर्मः सर्वत्र फलवान् भवति। श्रेष्ठः धर्मस्तु- दानं दया सतां पूजा व्यवहारेषु चार्जवम्। **एष राज्ञः परोधर्मः फलवान् प्रेत्य चेह च।।** (उत्तर.प्र.स. 02/10)

तव धर्मस्तु सद्भिराचरितः विदितः। रामः त्वं तु- ''**धर्माणां त्वं परं धाम गुणानां सागरोपमः**'' किं ते कार्यं करोम्यद्य-श्रीरामेण पृष्टः सारमेयोऽब्रवीदिदम्-

''**धर्मेण राष्ट्रं विन्देत धर्मेणैवानुपालयेत्।**
**धर्माच्छरण्यतां याति राजा सर्वभयावहः।।**''
(उत्तर.प्र.स. 02/15)

**धर्मरक्षार्थं भ्रातुः परित्यागः**- लक्ष्मणेन कृते नियमभङ्गे कालवाक्यानि संस्मृत्य दुःखमुपागतं श्रीरामं लक्ष्मणः मधुरया गिराऽब्रवीत् ''**जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव।।**'' (उत्तर. 106/04)। एवमेव महर्षिः वसिष्ठोऽप्यवादीत्- ''**मा प्रतिज्ञां वृथा कृथाः, प्रतिज्ञायां हि नष्टायां धर्मो हि विलयं व्रजेत्**''।। (उत्तर. 106/09)। एतच्छ्रुत्वा श्रीरामः लक्ष्मणमभाषत- ''**विसर्जये त्वां सौमित्रे मा भूद् धर्म-विपर्ययः।**'' (उत्तर. 106/13)। ततश्च लक्ष्मणः सरयूं निमज्य त्रिदिवं संविवेश। धर्मरक्षायै भ्रातुः हानिरपि सोढव्याऽभवत्।

**धर्मयुद्धम्**- श्रीरामः युद्धे रावणमभर्त्सयत्- त्वं दीनां विरहितां सीतां चौरवद् हृत्वा स्वं शूरं मन्यसे? त्वं कापुरुषः दुश्चरित्रः निर्लज्जश्चासि। ततस्तयोस्तुमुलं युद्धं प्रावर्तत। श्रीरामशरैः हन्यमानः रावणः शरासनं न चकर्ष, शस्त्रं नारेभे। तेन शराः शस्त्राणि च क्षिप्ताः। निरस्तवीर्यं पतितं रावणं सूतः रथेनापवाहयत्। एतस्मिन्नन्तरे श्रीरामः तस्य वधं कर्तुं समर्थ आसीत्- परं श्रीरामः धर्मेण नयेन च युद्धमकरोत्। अत एव राक्षस अकम्पनोऽपि ''परं धर्मगतो युधि'' (आण्य. 31/15) इति रावणं कथयन् श्रीराममशंसीत्।

**देशधर्मः ( जन्मभूमिं प्रति )** श्रीरामः स्वां जन्मभूमिं स्वर्गादपि, स्वर्णनिर्मितायाः लङ्कातोऽप्यधिकां गरीयसीं मन्यते स्म- ''**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।**'' (अज्ञातः, संभवतः दक्षिणभारतस्य कस्मिंश्चित् संस्करणे)

**अन्येषां मते ''रामो धर्मभृतां वरः** - रामो धर्मभृतां वरः,'धर्मज्ञः' धर्मरक्षक इत्यन्येऽप्येवमवादिषुः''

(1) हनुमान् सुग्रीवं प्रति - ''**धर्मे निगदितश्चैव पितुर्निर्देशकारकः**'' (किष्कि. 05/03)

(2) हनुमान् सीतां प्रति - ''**रक्षिता जीवलोकस्य धर्मस्य च परंतपः।**'' (सुन्दर. 3/07)

(3) हनुमान् रावणं प्रति- ''**रामो नाम महातेजा धर्म्यं पन्धानमाश्रितः।**'' (सुन्दर.51/06)

(4) मैनाकः हनुमन्तं प्रति- ''**रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः।**'' (सुन्दर. 58/18)

(5) ब्रह्मा श्रीरामं प्रति- **( 1 ) लोकानां त्वं परो धर्मः विष्वक्सेनश्चतुर्भुजः ( युद्ध.117/14 ) ( 2 )** ''**धर्मभृतां वरः।**'' (युद्ध 117/28)

(6) दशरथः श्रीरामं प्रति- ''**धर्मं प्राप्स्यसि धर्मज्ञः यशश्च विपुलं भुवि।**'' (युद्ध. 119/29)

(7) भरतः श्रीरामं प्रति- ''**त्वयि धर्मः परः साधो त्वयि सर्वा वसुन्धरा।**'' (उत्तर. 83/10)

(8) बालिः तारां प्रति- ''**धर्मज्ञश्च कृतज्ञश्च कथं पापं करिष्यति।**'' (किष्कि. 16/05)

(9) अगस्त्यः श्रीरामं प्रति- ''**प्रसाधि राज्यं धर्मेण गतिर्हि जगतो भवान्।**'' (उत्तर. 82/13)

(10) सुमित्रा कौशल्यां प्रति- ''**रामो धर्मे स्थितः श्रेष्ठो न च शोच्यः कदाचन।**'' (अयोध्या. 44/04)

सुष्पष्टं यत् श्रीरामः धर्मज्ञः धर्मभृतां वरः, धर्मतत्परः धर्मरक्षकः सत्यसन्धः, नीतिमान्, प्रजाहिते रतः, जीवलोकस्य स्वजनस्य च रक्षिता चासीत्। धर्मपरः स पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणाच्च चतुर्दश-वर्षाणि यावत् वनवासमसहत। सीताया अग्निपरीक्षा, तस्याश्चैव विवासनं, प्रियभ्रातुः लक्ष्मणस्य च विसर्जनं, पापिनो रावणस्याधर्मिणां राक्षसानां च वधमपि धर्मरक्षायै धर्मपालनाय चाकार्षीत्। सः यावज्जीवनं च कष्टान्यनुभूय धर्मात् पथः कदापि विचलितो न बभूव। **श्रीरामः मर्यादानाञ्च लोकस्य कर्ता कारयिता चासीदत** एव ''**मर्यादापुरुषोत्तम**''स्तथा च धर्मस्य साक्षात् प्रतिमूर्तित्वेन ''**रामो विग्रहवान् धर्मः**'' इति च कथितः। श्रीरामः प्रजादुःखं स्वदुःखं मनुते स्म। राम-राज्ये सर्वाः प्रजाः धर्मपराः, सत्यव्रताः, नित्यप्रमुदिताः, नानृताश्चासन्- अत एवैतर्ह्यपि जनाः रामराज्यं प्रशसन्ति, स्मरन्ति, सर्वदा स्मरिष्यन्ति च।

**निदेशकचरः**
**संस्कृतशिक्षाविभागः, राजस्थानम्**
**मो.: 8946863430**

# आत्मकल्याणमार्गः क्रियायोगः

❑ डॉ. दिवाकरमिश्रः

भारतीयचिन्तनपरम्परायां मानवजीवनस्योच्चतमं लक्ष्यम् अतृप्तवासनादिकं सर्वविधं क्लेशं विजित्य सच्चिदानन्दप्राप्तिः मन्यते। उद्देश्यस्यास्य पूर्तये विवेकवन्तः जनाः स्व-स्व प्रकृत्यनुगुणं, रुच्यनुरूपं बुद्ध्याश्रितञ्च विविधसाधनानि आश्रयन्ति। परञ्चैतेषां सर्वेषां साधनानां स्वरूपभिन्नत्वेऽपि लक्ष्यमेकमेव भवति, नात्र कश्चन संदेहावसरः।

मानवजीवनस्य परमोद्देश्यप्राप्तये ऋषिभिः महर्षिभिश्च पात्रताभेदेन जप-तप-उपासना-भक्ति-कर्मकाण्डेत्यादीनां मार्गाणां विधानं कृतम्। अत्रेदमवधेयमस्ति यदिमे मार्गाः आत्मोत्थानस्य चरमोत्कर्षं न प्रापयन्ति। एभिस्तु सांसारिकजीवने उन्नतिं कुर्वतः सुखप्राप्तिः देहत्यागे च स्वर्गप्राप्तिर्भवतीति तथ्यं, 'स्वर्गकामो यजेत' अनेन विधियुतेन श्रुतिवचनेनापि सुस्पष्टमेवास्ति। आत्मनः चरमोत्कर्षस्य तात्पर्यमस्ति कैवल्यप्राप्तिः। सज्ज्ञानं प्राप्यैव आत्मन अन्तिमलक्ष्यस्य कैवल्यस्य, मोक्षस्य परमानन्दस्य प्राप्तिः सम्भवास्ति। परमानन्दप्राप्तये उपर्युक्तसाधना-न्यतिरिच्य येषां श्रेष्ठानां साधनानामावश्यकता भवति, तेषु साधनेषु '**योगमार्गः**' अन्यतमं साधनमस्ति यत्र अन्येषु मार्गेषु केवलं सैद्धान्तिकं विवेचनं प्राप्यते। इत्थम् अस्य योगदर्शनस्य मार्गः **क्रियात्मको** वर्तते। योगिनः योगाभ्यासकर्तारो वा अस्य मार्गस्य सत्यतायाः यथार्थतायाश्च प्रत्यक्षानुभवं कर्तुं शक्नुवन्ति।

योगस्य स्वरूपमुद्घाटयन्तः केचन विद्वांसः अस्य स्वरूपम् 'उद्योग अभ्यासो वा' इति वदन्ति। केचन 'वियोगः वैराग्यम् वा' इति कथयन्ति, अन्ये च संयोगः प्रणिधानम्वा इति आमनन्ति। वस्तुतः योगे एतेषां त्रयाणां मार्गाणां समाहारोभवति। एषु त्रिषु एकमपि विहाय कैवल्य-नामकस्य लक्ष्यस्य प्राप्तिरसम्भवा एव वक्तव्या। योग- शब्दस्य व्युत्पत्तिलभ्यौ द्वौ अर्थौ भवतः। तत्र **प्रथमोऽर्थः** जीवेश्वरयोः आत्म-परमात्मतत्त्वयोर्वा मेलनम्, अर्थात् अद्वैतानुभूतिः। **द्वितीयः** वैराग्येन अभ्यासेन च चित्तवृत्तीनाम् एकाग्रता समाधिर्वा। योगदर्शनस्य भाष्यकारेण भगवता व्यासेनापि योगस्यार्थः समाधिरेव प्रतिपादितः। यतः, अस्याम् अवस्थायामेव त्रिवृत्तीनां निरोधः परमात्मना च तादात्म्यं स्थापितं भवति।

एवंविधस्य अद्वैतानुभूतिसाधनरूपस्य योगदर्शनस्य का उपयोगितेति विज्ञानाय अथर्ववेदस्य अयं मन्त्रः द्रष्टव्यो वर्तते- ''अन्ति सन्तं न जहाति, अन्ति सन्तं न पश्यति......'' (अथर्व. 10/8/32)। इयं सांसारिकी विडम्बनास्ति यदस्मिन् जगति जनाः अविद्यया पार्श्वस्थितं भौतिकमशाश्वतञ्च पदार्थं न त्यजन्ति, अर्थात् अधिकाधिकं वाञ्छन्ति, परञ्चात्मनि स्थितं परमात्मतत्वं न अवलोकयन्ति। अस्याः समस्यायाः समाधानमेवात्र योगदर्शने क्रियात्मकरीत्या प्रस्तुतं भगवता पतञ्जलिना। अनेन क्रियात्मकयोगमार्गेण सा दृष्टिः विकसिता भवति, यया दृष्ट्या योगिनः परमात्मतत्वं न केवलं पश्यन्ति, साक्षात्कृत्य सान्निध्यमपि प्राप्नुवन्ति।

वस्तुतः परमात्मतत्त्वम् अनवलोक्य भौतिकपदार्थेषु आसक्तिं कुर्वन्तो जनाः येषां दुःखानाम् अनुभवं कुर्वन्ति, तेभ्यः दुःखेभ्यः मुक्तय एव सर्वेषां दर्शनानामुद्भवः जातः। तत्र योगदर्शने इमानि सांसारिकदुःखानि-अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्चेति पञ्चक्लेशनाम्ना वर्णितानि। तद्यथा-

''**अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः**'' (योगदर्शनम्, साधनपादः-3)। एतेषां कारणं निवारणञ्चात्र वर्णितः। क्लेशानां कारणम्, यथा-

''**क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः**'' (योगदर्शनम्, साधनपादः-12)

क्लेशानां निवारणं यथा-

"**ध्यानहेयास्तद्वृत्तयः**" (योगदर्शनम्, साधन-पादः-11)। अनया दृष्ट्या योगदर्शनं व्यावहारिकं दर्शनं कथयितुं शक्यते। अत्र येषां तत्त्वानां प्रतिपादनं विहितम्, तेषां प्रत्यक्षानुभूतेः क्रियात्मकमार्गोऽपि प्रदर्शितः। दर्शनस्यास्य इदं वैशिष्ट्यमवलोक्यैव निखिलेऽपि विश्वे आत्मकल्याणस्य सर्वाधिकं महत्वपूर्णो मार्गो क्रिया-योगमार्गो मन्यते। एतदर्थं विविधसम्प्रदायेषु दीक्षिताः साधवः साधकाः सामान्यनागरिकाश्च आत्मकल्याणाय योगस्य क्रियात्मकं स्वरूपविशेषम् अवश्यमाश्रयन्ति। विशिष्यभारतीयसंस्कृतौ योगमार्गस्य यन्महत्वपूर्णं स्थान-मस्माभिरवलोक्यते तस्य हेतुः, प्राक्तना साधनापद्धति अर्थात् योग एवास्ति। यद्यपि महर्षि-पतञ्जलिभिः जनसामान्येभ्यः सुव्यवस्थितः योगमार्गः समुपस्थापितः, परञ्च वेदादारभ्य रामचरितमानसपर्यन्तं सर्वत्र मार्गस्यास्य उल्लेखः प्राप्यते। ऋग्वेदस्यायमुद्घोषो वर्तते यद्योगं विना विदुषां यज्ञकर्म न सिद्ध्यति।

"**यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन् स धीनां योगमिन्वति।**" (ऋग्वेदः - 1-18-7)

एवमेव सामवेदे ऋषिभिः समाध्यर्थं ऋतम्भराप्रज्ञायै च परमेश्वरः प्रार्थ्यते-

"**सा घा नो योग आभुवत् स रात्रे स पुरं ध्याम्। गमद बाजेभिरा स नः।**" (सामवेदः - 1-2-10)

कठोपनिषदि योगस्य स्वरूपं सुस्पष्टरीत्या वर्णित-मस्ति-

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**
**बुद्धिश्च न विचेष्टेत तमाहुः परमां गतिम्।।**
**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**
**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।।**

(कठोपनिषद् - 2-3-10, 11)

श्वेताश्वतरोपनिषदि सरलरीत्या आसन-प्राणायाम-ध्यानेत्यादीनां योगविधीनां सुस्पष्टवर्णनं कृतमस्ति। तद्यथा-

**त्रिरुन्नतं स्थाप्य समं शरीरं,**
**हृदीन्द्रियाणि मनसा संनिरुध्य।**
**ब्रह्मोडुपेन प्रतरेत् विद्वान्,**
**स्रोतांसि सर्वाणि भयावहानि।।**
**प्राणान्प्रपीड्येह संयुक्तचेष्टः,**
**क्षीणे प्राणे नासिकयोच्छ्वसीत।**
**दुष्टाश्वयुक्तमिव वाहमेनं,**
**विद्वान्मनो धारयेताप्रमत्तः।**
**समे शुचौ शर्करावह्निवालुका-**
**विवर्जिते शब्दजलाश्रयादिभिः।**
**मनोऽनुकूले न तु चक्षुपीडने,**
**गुहानिवाताश्रयणे प्रयोजयेत्।।**

(श्वेताश्वतरोपनिषद्-2-8,9,10)

एवमेवात्रैव अग्रिमेषु पद्येषु साधनाकाले साधकै-रनुभूयमानानाम् अनुभवानां वर्णनं योगसाफल्य-लक्षणरूपेण कृतम्।

योगशास्त्रनाम्ना सुख्यातायां गीतायां 'निष्काम' इति वचनेन योगस्य श्रेष्ठतमा व्याख्या कृता। अनया व्याख्ययापि योगस्य क्रियात्मकस्वरूपम् एवाभिव्यक्तं भवति। अत्र पातञ्जलयोगदर्शनप्रतिपादितविधीनां यथा तथ्यं वर्णनं प्राप्यते। तद्यथा-

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।।**
**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।**
**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**
**सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।।**
**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।**
**मनः संयम्य मच्चित्तो युक्त आसीत मत्परः।।**

(गीता-6-11-12,13,14)

एवमेवात्रैव योगिभ्यः क्रियमाणानाम् आचार-व्यवहाराणां सुस्पष्टं विवेचनं कृतं भगवता कृष्णेन-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।**

(गीता-6-17)

योगमार्गस्य श्रेष्ठतायाः श्रेष्ठयोगिनश्च स्वरूपमुपस्थापयति गीतायां भगवान् कृष्णः -

**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**
**कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।**

(गी. 6-46)

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**
**सुखं वा यदि वा दुःखं स योगी परमो मतः।।**

(गी. 6-32)

विद्वद्भिरष्टादशपुराणेषु श्रेष्ठतमपुराणरूपेण ख्यापिते श्रीमद्भागवतपुराणेऽपि योगसाधनायाः सर्वाङ्गवर्णनं प्राप्यते। उपयुक्तासनयोगाभ्यासयोर्वर्णनं यथा-

**गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः।**
**शुचौ विविक्त आसीनो विधिवत् कल्पितासने।।**

(भाग. पु. 2-1-16)

**शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्।**
**तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत्।।**

(भाग. पु. 3-28-8)

पूरककुम्भकरेचकैः प्राणायामैः मनस एकाग्रतायाः सुस्पष्टनिर्देशोऽत्र वर्तते। तद्यथा-

**प्राणस्य शोधयेन्मार्गं पूरककुम्भकरेचकैः।**
**प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम्।।**

(भाग. पु. 3-28-9)

**अभ्यसेन्मनसा शुद्धं त्रिवृत्त-ब्रह्माक्षरं परम्।**
**मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्।।**

(भाग. पु. 2-1-17)

एवमोङ्कारमन्त्रयुक्तस्य प्राणायामस्य फलमत्र मनोमालिन्यवारणमिति लोहोपमानेन समुपस्थापितम्-

**मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः।**
**वायुवग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्।।**

(भाग. पु. 3-28-40)

धारणानन्तरं भगवतः ध्यानस्य अत्यन्तं भावपूर्णं वर्णनमत्र कृमस्ति भगवता व्यासेन-

**ध्यानायनं प्रहसितं बहुलाधरोष्ठ-**
**भासारुणायिततनुद्विजकुन्दपङ्क्तिः।**
**ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोः,**
**भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत्।।**

(भाग. पु. 3-28-33)

गोस्वामी-तुलसीदासेनापि रामदशाव्याजेन रामचरितमानसे ज्ञान-वैराग्य-योग-भक्तिसम्बद्धानां गम्भीरप्रश्नानां समाधानं सरलरीत्या प्रस्तुतम्। विशिष्य 'अरण्यकाण्डे' योगो मोक्षप्राप्तेः साधनं कथितम्। तद्यथा-

**धर्म तें बिरति जोग तें ग्याना।**
**ग्यान मोच्छप्रद बेद बखाना।।**

(रामचरिमानस, अरण्यकाण्ड दो. 15)

विवेचनेनानेन सुस्पष्टं भवति यत् भारतीयसंस्कृतौ सुप्रतिष्ठितस्य योगस्य मूलाधारः वैदिककालादेव सुदृढतमो वर्तते। परञ्चास्य व्यवस्थितस्वरूपं योगदर्शने प्राप्यते। गच्छता कालेन रुचिभेदात् पातञ्जलयोगदर्शन- माश्रित्यैव विविधयोगमार्गाणां प्रचारो जातः। तद्यथा- पञ्चमहाभूतैः निर्मितस्य देहस्य महत्त्वमङ्गीकृत्य नेति-धौति-वस्तीति क्रियाभिः हठयोगस्य, मनसः महत्त्वमङ्गीकृत्य संयम-सङ्कल्पशक्तिभी राजयोगस्य, 'अहं ब्रह्मास्मि' इति सिद्धान्तमङ्गीकृत्य ब्रह्मसाक्षात्काराय ज्ञानयोगस्य, ज्ञानयोगमार्गस्य काठिन्यमवलोक्य भक्तियोगस्य चाविर्भावो जातः। एवमेव पात्रभेदात् साधनविधिभेदाच्च जप-लय-ध्यान-तंत्रयोगेत्यादीनां विविधयोगमार्गाणां प्रसारोऽवलोक्यते। अयं हि प्रसारः सुसङ्गत एव वक्तव्यः यतः भोगस्यार्थ एव परमात्म-साक्षात्कारसाधनत्वेन क्रियते। ध्यातव्यमस्ति यत् साध्यप्राप्तौ साधनोपयुक्तता साधकस्य च कुशलता अनिवार्या भवति। एवदर्थं भगवता पतञ्जलिना **'योगश्चित्तवृत्तिनिरोधः'** (यो. दर्शनम्, समाधिपादः-2) इति सूत्रेण सर्वप्रथमं योगसिद्धेः मूलमन्त्रं प्रतिपाद्य चित्तवृत्तिनिरोधाय अष्टाङ्गयोगे साधनानि वर्णितानि। तद्यथा 'यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधयोऽष्टावङ्गानि' (यो. दर्शनम्, साधनपादः-29)।

एवं योगदर्शनस्यानुशीलनेनेदं विदितं भवति यद् योगः आध्यात्मिकलक्ष्यप्राप्तेरनुपमसाधनेन सह सांसारिकजीवने-

ऽपि साफल्यमवाप्तेः सर्वोत्तमो मार्गो वर्तते। अमुं मार्गमनुसृत्य सामान्या अपि जनाः एवं सांसारिक-जीवनमुन्नतं कुर्वन्तः परमात्मतत्त्वं साक्षात्कर्त्तुं शक्नुवन्ति। अस्मिन् जगति इच्छाधारणेति द्वे प्रबले शक्ती वर्तेते। यावन्तोऽपि महापुरुषा अभवन्ते आभ्याम् शक्तिभ्यामेव लोकहितं कुर्वन्तः आत्मकल्याणमकुर्वन्। महत्सु इमे शक्ती पूर्वजन्मार्जितसंस्कारादेव भवतः। येन एते यमनियमादीनाम् अष्टाङ्गयोगसाधनानाम् अभ्यासं विनापि वीतरागाः भवन्ति सहैव शुद्धान्तःकरणेन निष्कामवृत्तिमाचरन्तः समाधिं प्राप्नुवन्ति। परञ्च ये रागद्वेषादिवासनालिप्ताः सामान्यजनास्सन्ति तेषामपि कल्याणं भवेदिति धियैव योगदर्शनस्य द्वितीयभागे साधनपादे भगवता पतञ्जलिना क्रियायोगस्योपदेशः कृतः। तद्यथा-

**'तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'**

(यो. दर्शनम्, साधनपादः-1)

यद्यपि चित्तशुद्धेः सरलोपायत्वेनात्र स्वीकृतानि तपः-स्वाध्याय-ईश्वरप्रणिधानानीति त्रीणि क्रियायोग-साधनानि अष्टाङ्गसाधनेषु परिगणितनियमसाधनान्तर्गत-वर्णितानि सन्ति, तदपि एतेषां पृथगुपदेशः क्रियायोगस्य वैशिष्ट्यं प्रकटयति। तद्यथा- **'शौचसंतोषतपः स्वाध्यायेश्वर-प्रणिधानानि नियमाः'** (यो. दर्शनम्, साधनपादः -32)

वस्तुतः, त्रिभिरेभिः क्रियायोगसाधनैः सामान्या अपि जनाः अष्टाङ्गयोगसाधनं विनैव अविद्यादिक्लेशजन्य मनोमालिन्यं परिहृत्य समाधियोग्यतामवाप्तुं शक्नुवन्ति। अनया भावनयैव क्रियायोगफलं विवेचितं पतञ्जलिना। तद्यथा- **'समाधिभावनाभिः क्लेशतनूकरणार्थश्च'** (यो. दर्शनम्, साधनपादः-2)

अत्रेदं ध्यातव्यमस्ति यत् तपसा मनः इन्द्रियाणि च मालिन्यरहितानि भवन्ति, स्वाध्यायेन चित्तशुद्धिर्भवति समाधियोग्यता चागच्छति ईश्वरप्रणिधानेन च असम्प्रज्ञातसमाधेः प्राप्तिर्भवति। अतः सावधानचेतसा क्रियायोगस्य अभ्यासः साधना वा कर्तव्या-येनात्मकल्याणं स्यात्। विशिष्य सांसारिकजीवने साफल्याय ज्ञानस्य महती आवश्यकतास्ति। ज्ञानहीनाः जनाः सुयोग-दुर्योगयोर्मध्ये अन्तरं न पश्यन्ति, येन ते सर्वत्र पीडिताः भवन्ति। अस्यामवस्थायां सद्ग्रन्थानां नियमितस्वाध्यायः पथप्रदर्शको भवति। एवमेव जीवने प्रतिपदं काठिन्यं तु आगच्छत्येव। कठिनपरिस्थतावपि ससम्मानं जीवन-यापनं दृढतायाः सहिष्णुतायाश्चाभावे असम्भवमेव वक्तव्यम्।

तदर्थं तपसा अन्तःकरणशुद्धिः कर्त्तव्या शुद्धान्तः करणे जाते च सत्याहिंसा प्रियवादिता सहिष्णुतादयो गुणाः विकसिताः भवन्ति। एतदनन्तरं स्वकर्त्तव्याणि पालयन् जनैः सर्वदा इदन्ध्यातव्यं यत् जगन्नियन्ता ईश्वरो वर्तते। सः यत् किमपि करोति तदस्माकं कल्याणायैव करोति। अतः निखिलमपि अनुष्ठितं कर्म क्रियात्मक-योगविधिना अर्थात् ईश्वरप्रणिधानेन तस्मै समर्प्य विश्वासेन भाव्यम्। वस्तुतः, योगदर्शनवर्णितयम-नियमानामनुपालनया मानवेषु मानवीयता विकसिता भवति। सामाजिकोन्नतये मानवेषु इयं मानवीयता-निवार्यास्ति। तथ्यमिदं मनसि निधाय योगदर्शनकारेण यम-नियमानां योगदर्शने विशदं विवेचनं कृतमस्ति। विशिष्य उक्तेषु पञ्चनियमेषु जनसामान्येभ्यः तपः-स्वाध्याय-ईश्वरप्रणिधानेत्याख्याः त्रयो नियमाः क्रियायोगत्वेन पृथग्वर्णिताः।

पातञ्जलयोगदर्शनस्य व्यावहारिकपक्षः एवास्य बृहत्तमा विशेषतास्ति यत्र अन्येषु दर्शनेषु सैद्धान्तिक-वाग्जालैः ईश्वरसिद्धे आभासमात्रं कार्यते, तत्र योगदर्शनम् ईश्वरप्राप्तये यम-नियमासनप्राणायामेत्यादीनाम् अष्टाङ्ग-योगविधीनां प्रायोगिकं स्वरूपमुपस्थाप्य अस्माकं शरीरं बलयुतम्, मनः पवित्रम् चित्तञ्च एकाग्रं करोति येन समाधियोग्यता प्राप्ता स्यात् इति उपदिशति। किं बहुना जनसामान्येभ्यः शारीरिकस्वास्थ्यप्रदः, मानसिक-स्वास्थ्यसंवर्धकः, आत्मकल्याणोपकारकश्च मार्गः योगदर्शनस्य क्रियायोगमार्ग एवास्तीति।

**सहायकाचार्यः**
**शिक्षाशास्त्रविभागीयः**
**जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-**
**विश्वविद्यालयः, जयपुरम् (राजस्थानम्)**

# धर्मो हि मम जीवनम्

❑ पं. नथमलशास्त्रीदाधीचः

**धर्माचार्याश्च धर्मश्च धर्मग्रन्थास्तथैव च।**
**धर्मसापेक्षतासिद्ध्यै सदा सेव्याः प्रयत्नतः।।**

अखिलकोटिब्रह्माण्डनायको जगद्गुरुः सच्चिदानन्दरूपो भगवान् श्रीकृष्ण एव "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इति भागवतशास्त्र-सिद्धान्तं स्वहृदि सन्धार्य सम्यग्विश्वस्य च-

**जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।**
**त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुनः।।**

इति गीतोक्तवचनञ्चानुसृत्य लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य तद्दिव्यं जन्म कर्म च तत्त्वतो ज्ञात्वा नरो जन्म-मरणात्मकभवबन्धाद्विमुच्येत, अस्मिन्नेव जन्मन्यन्ते भगवत्प्राप्तिरूपम् आत्यन्तिकं सुखमखण्डं परमानन्दं वा लभेत, इत्येव बुद्धिमतां बुद्धिरुच्यते। सर्वेभ्य एवैष निष्कण्टकः पन्थाः सुलभो वर्तते परमस्मिन् पुरुषार्थे नित्यप्रवृत्तये वैदिकसनातनभागवत-धर्मस्याध्यात्मविद्यायाश्च प्रतिपादकश्रुतिस्मृतिपुराणादि-धर्मग्रन्थानां नित्यस्वाध्यायो विधेयः।

यतोहि "श्रुतिस्मृती ममैवाज्ञे" इति भगवद्वचः प्रमाणम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति श्रुतिवाक्यञ्चास्मत्कृते प्रेरणास्पदमास्ते। प्रत्यहमस्मिन् स्वभावनियतकर्मणि विज्ञैर्विद्वद्भिरप्रमत्तैर्भाव्यमिति सामयिकं सत्कर्म वर्तते। ध्यातव्यम्- मायावश्योऽयम-विनाशी चेतनो जीवः परमात्मनोऽहैतुकीकृपयैव सुदुर्लभमपि क्षणभङ्गुरं नृदेहं प्राप्नोति। एतदर्थं जीवस्य कानिचित् जन्मजन्मान्तरोपार्जितानि ज्ञाताज्ञातकर्मफलानि न भवन्ति कारणानि।

**श्रीमद्गोस्वामिना रामचरितमानसे स्पष्टीकृतं तथ्यमिदम्।**
**आकर चारि लाख चौरासी योनि भ्रमत यह जीव अविनाशी।**
**विश्व सदा माया कर प्रेरे काल कर्म स्वभाव गुण घेरे।**
**कबहुक करि करुणा नर देही देत ईश बिनु हेतु सनेही।**

अयं जीवस्तु भगवतश्चेतनात्मिका परा प्रकृतिरुच्यते, ययेदं जगद्धार्यते।

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।**

इति गीतोक्तभगवद्वचनानुसारं यदा कोऽपि विवेकी सत्पुरुषः 'श्रीकृष्णः शरणं मम' इत्यष्टाक्षरमन्त्रमुच्चार्य भगवन्तं प्रपद्यते, तदैवाकारणकरुणावरुणालयोऽनाथ नाथः शरणागतप्रतिपालको भक्तवत्सलो भगवांस्तस्मै धृतिगृहीतां निश्चयात्मिकां विमलां मतिं प्रददाति। ततश्च तद्भक्तस्य संकल्प-विकल्पात्मकं मनः सुस्थिरं निर्विषयञ्च जायते। तस्य च मनसि धर्मजिज्ञासा ब्रह्मजिज्ञासा च समुत्पद्येते। स च "क्षिप्रं भवति धर्मात्मा" सर्वपाप-विनिर्मुक्तो भूत्वा भगवत्कृपा-पात्रताञ्च भजते।

आद्याचार्यो ज्ञानावतारो भगवान् वेदव्यासो गीताशास्त्रे 'कुलधर्माः सनातनाः' इति शाश्वतसिद्धान्तं प्रतिपादितवान्। अनेन कुलधर्माणां नित्यता ज्ञायते, कुलस्य कुलधर्मस्य चान्योन्याश्रयसम्बन्धो विद्यते। अनयोर्द्वयो-रेकस्यापि रक्षणेन द्वयोरेव रक्षा सुनिश्चिता सम्भवति। जीवस्य परलोकयात्रायामपि सहयात्रित्वेन 'धर्म एकोऽनुगच्छतीति वाक्यं जीवधर्मयोरखण्ड-सम्बन्धं नित्यसाहचर्यञ्च बोधयति। एवञ्च ममैवांशो जीवलोके जीवभूतः सनातनः (गीतायाम्), ईश्वर-अंश-जीव-अविनाशी। चेतन अमल सहज सुखराशी।। (रामायणे)। यथाकुलधर्मा सनातनास्तथैवेश्वरांशश्चेतनो जीवोऽपि सनातनो निरूपितोऽस्ति। स च प्राणिनां हृद्देशे एवेश्वरसन्निधौ तिष्ठति। श्रीहरेर्नित्यदासो जीवस्तु सहज सुखराशिरविनाशी च गीयते।

**धर्मस्य तत्त्वं निहितं गुहायाम्** (उपनिषदि)

भगवत्प्रणीतधर्मस्य तत्त्वमपि सर्वभूतानां हृदयरूप-गुहायामीश्वरसन्निधावेव निहितं रक्षितञ्चास्ते।

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**
**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया।।**

एवमेव- **सर्वस्य चाहं हृदि सन्निविष्टः** (गीतायाम्) सर्वभूतानामभिन्नः सुहृदीश्वरोऽपि हृद्देशे विराजमानो यन्त्रारूढानीव सर्वभूतनि स्वमायया भ्रामयति प्रतिक्षणम्।

**ईश्वरस्य च जीवस्य स्वधर्मस्य तथैव च।**
**त्रयाणां सन्निधिर्ज्ञेयो हृद्देशे सर्वप्राणिनाम्।।**

एवं प्रतिक्षणं धर्मजीवेश्वराणां शाश्वतीं सन्निधिमनुभूयैव स्वधर्मनिष्ठो नरो मायाविरचितेऽस्मिन् संसारे सर्वविधभौतिकसुखं सुयशश्च सम्प्राप्य स्वकीयजीवनसंग्रामे कामक्रोधलोभमोहादिषड्रिपून् विजित्य च सर्वश्रेयस्करीं प्रसिद्धिं सर्वश्रेयस्करीं सिद्धिञ्च समधिगच्छत्यत्र नास्ति कोऽपि सन्देहलेशावसरः। यतो हि स्वधर्माचरणेनैव जनोऽभ्युदयनिः श्रेयससिद्धिं लभते।

**''यतोऽभ्युदयनिःश्रेयसिसिद्धः स धर्मः।''**

**द्वापरयुगे**- धर्मक्षेत्रे कुरुक्षेत्रे भारते युद्धे भरतवंशी पाण्डुनन्दनो वीरवरोऽपि विषादग्रस्तोऽर्जुनो विश्वमानवस्य प्रतिनिधित्वं समाचरन् भगवन्तं शरणापन्नो बद्धाञ्जलिः प्रार्थयते।

**शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्**

इत्युक्त्वा श्रीकृष्णं शरणंगतो महाभागवतोऽर्जुनो भगवत्कृपया भगवतो मुखपद्माद्विनिःसृतं दिव्यं तद् गीतामृतं सावधानतया पपौ। योगयोगेश्वरो जगद्गुरुर्भगवान् श्रीकृष्णस्तस्मै सर्वजनहिताय सर्वजनसुखायैव तद् गीतामृतं पाययामास।

**कृष्णप्रीत्यै तदेवात्र ज्ञानामृतपिपासया।**
**किञ्चिन्मात्रं समुद्धृत्य प्रस्तौमि हृष्टमानसः।।**

**हे कौन्तेय! यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।**

अत्र कुत्रापि कदापि कथमपि यदि किञ्चिदपि त्वं सत्कर्म करोषि यच्चाश्नासि पेयञ्च पिबसि यच्चाऽग्नौ जुहोषि यच्च दानं ददासि, यच्च कायिकवाचिकमानसिक तपस्तपसि तत्सर्वं मदर्पणं कुरुष्व। अनेन तव कर्मफलासक्तिर्विलयं यास्यति यतो हि ''फले सक्तो निबध्यते''। लोकाः क्षेमं न विन्दन्ति विना मदर्पणम्।

**एवञ्च-अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।**

नश्वरं दुःखमयमिमं लोकं नृदेहं वा समधिगत्य त्वं सर्वतोभावेन पुरुषोत्तमं मां भजस्व। नित्यं सत्यं ज्ञानममृतञ्च लभस्वेति। अत्र **प्रवृत्ति**-धर्मोपदेशः।

तथा च- **न तद् भासयते सूर्यो न शशङ्को न पावकः।**
**यद् गत्वा न निवर्तन्ते तद्धाम परमं मम।।**

इति भगवद्वचनमनुसृत्य ज्ञानविज्ञानकर्मभक्तियोगात्मिकां स्वधर्मनिष्ठामाधृत्याध्यात्मिकयोगविद्यां साधनाञ्चाङ्गीकृत्य विगतेच्छाभयक्रोधः सन्नरोऽन्तकाले भगवन्तं स्मरन् कलेवरं त्यक्त्वा दिव्यदेहेन भगवत्तेजसा प्रतिभासितं तद्दिव्यं धाम प्राप्तिरूपमुत्कृष्टतमं लक्ष्यं (भगवत्सालोक्यं सामीप्यं सारूप्यं सायुज्यञ्च) भगवद्भावं समधिगच्छति, नास्ति कश्चित्सन्देहोऽत्रेत्युक्तं भगवता।

**''अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।**
**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।''**

ततश्च- पुनरागमनं (पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्) कदापि नैव भवति जीवस्येति सिद्धान्तः। अयमेव नृदेहप्राप्तेः परमो लाभः। सा काष्ठा सा परा गतिरेव ज्ञानिनां योगिनां ब्रह्मविदाञ्च ब्रह्मप्राप्तिर्भक्तियोगिनां भागवती गतिः शास्त्रेषु परिवर्णितैवास्ति। अत्र **निवृत्ति**धर्मोपदेशः।

**अत एव मूलतः स्वधर्मनिष्ठापरिरक्षणीया सन्धारणीया खलु नित्ययुक्तैः। राष्ट्रे समाजे जनजीवने च प्रचारणीया सततं प्रबुद्धैः।**

**वेदव्यासेन गीतायां व्यञ्जिता शब्योर्द्वयोः।**
**धर्मसापेक्षता सिद्धिः सर्वलोकसुखावहा।।**
**गीतायाः प्रथमः शब्दो धर्मो ममेति चान्तिमः।**
**अस्यार्थः पाठकैर्ज्ञेयो धर्मो हि मम जीवनम्।।**

**छापर**
**मो.: 9351226660**

# मूल्यशिक्षादृष्ट्या पुरुषार्थानां मीमांसा

❑ डॉ. कुलदीपसिंहः

नागरिकतायास्सांस्कृतिकप्रगतिः तद्देशीयनागरिकैः सुनिर्मितां मूल्यव्यवस्थामुपजीवति। संसारस्य प्राचीन-सभ्यतासु भारतीयदार्शनिकविकासेन मूल्येभ्यः प्रचुरं प्राधान्यं दत्तम्। अनन्तरकालिकाः दार्शनिकसम्प्रदायाः, कलाविज्ञानादीनि च प्राचीनमूल्यव्यवस्थात एवोत्पन्नानि।

वस्तुतो विमृशामश्चेत् मानवीयमूल्यविषयिणी चिन्तनधारा मानवस्य सामाजिकजीवनप्रारम्भादेव उपक्रान्ता। जीवनस्य, ज्ञानस्य, आनन्दस्य च प्राप्त्यै आकाङ्क्षा नितरां नैसर्गिकी। अत्रैव मानवस्य नैतिकसामाजिकजीवनस्योदयः। स्वेच्छापेक्षाभिस्सह इतरेच्छापेक्षाणां सम्पूर्तिविषयकं चिन्तनमेव नैतिकता-यास्सामाजिकजीवनस्य च मूलभूतसिद्धान्तः। यथोक्तम्-

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**

शुक्लयजुर्वेदः 40/6

प्रत्येकस्मिन्नपि देशे निबद्धं वाङ्मयं तद्देशीयानां संस्कृतिजीवनयोः आदर्शाकाङ्क्षाणाञ्च प्रतिबिम्बनं भवति। भारतीयानां संस्कृतिजीवनादर्शाकाङ्क्षाः संस्कृतवाङ्मयदर्पणे सुष्ठु प्रतिबिम्ब्यन्ते। केनचिद्विदुषा मूल्यतथ्ययोरन्तरमित्थं प्रादर्शि- **''तथ्यानि ज्ञायन्ते मूल्यानि तु यथार्थीक्रियन्ते।''** इत्थं मूल्यं साध्यवस्तु तथ्यं तु सिद्धवस्तु। मूल्यं न केवलमधिगम्यते प्रत्युत प्रशंस्यते च। मूल्यं मानसिकशाब्दिकशारीरिक-स्वभावानामपेक्षत इति कृत्वा तस्मिन् तत्प्राप्तिमार्गोपायः तत्फलञ्च अन्तर्निहितं भवति। यथोक्तम्- **''मनसा यथार्थचिन्तनम् ऋतम्। वचसा यथार्थभाषणं सत्यम्। वपुषा यथार्थाचरणं धर्मः।''** भारतीय-सम्प्रत्यये धर्मार्थकाममोक्षाः प्रत्येकमपि मानवस्य जीवनमूल्यत्वेन स्मृत्यादिभिः निर्दिष्टाः। **धर्मार्थ-कामाख्यत्रिवर्गः उपाचारमूल्यं** भवति मूल्यानि सर्वथा मानवीयानि भवन्ति यतः अन्ये प्राणिनः स्वीयमूलप्रवृत्त्या प्रेरितास्सन्तो व्यवहरन्ति न तु मानव इव मूल्यप्रेरिताः। मूलप्रवृत्तयस्तु तथ्यसहयोगिन्यः। परं मूल्यानि न चतुष्टयभावनायाः मूलकन्दः। अयं संस्कारानपेक्षते। संस्कारपदमेव परिशुद्धिभावनां द्योतयति। इमे एव संस्काराः वर्णाश्रमधर्मपालने सार्थकाः भवन्ति। मानवीयस्य परिपक्वताप्राप्त्यभिलाषस्याऽस्य मूलं कर्मसिद्धान्ते द्रष्टुं शक्यते। मूल्यानामात्मसात्करणमात्म-साक्षात्कारे परिणमति। इत्थं ज्ञाता ज्ञातव्यत्वेन परिणमते। इयञ्च परिणमनप्रक्रिया मानवजातेः दैवकृतं वरदानमेव। वस्तुतः इयमेव मृगमानवयोः भेदकारिणी काचन शक्तिः। ईदृशात्मसाक्षात्कार एव वेदान्ते साक्षिपदेन अभिधीयते। इयं परिपक्वभावना मानवात्मनि स्थिता आध्यात्मिकव्यक्तिरूपेण परिणमयति। यद्यपि आत्म-निश्चयशक्तिः आत्मविमर्शनाद् भिद्यते। मानवे स्थिता आत्माऽऽवरणरूपा अविद्यात्वेन कथ्यते। परं मानवजातिः स्वीयलक्ष्यं मोक्षप्राप्तौ स्वीयाशक्ततां च अभिजानाति। वस्तुतः आदर्शं यथार्थमित्युभयं मानवो जानाति। मानवेतिहासे श्रेयःप्रेयसोः प्राप्तिविषयकः सङ्घर्षः वस्तुतो विस्मयजनकः। अस्यामेव प्रक्रियायां नैतिकता, दया, पुण्यमितीमानि विकासं समवाप्य धर्मे समग्रतां प्राप्नुवन्। धर्मो भौतिकावश्यकतायै प्राधान्यं ददाति न तु भौतिकेच्छानाङ्कृते। (आवश्यकता नैसर्गिकी, इच्छा तु अप्राकृतिकी) अतः स्वार्थेच्छा-नियमनस्य उत भोगेच्छापरिमितेः महत्प्राधान्यं दत्तं धर्मे। एतत् साधनचतुष्टयरूपेण अभ्यस्यते। अत्रैव दर्शनं पदं निदधाति।

सच्चिदानन्दमार्गेण मानवैः महोच्चमूल्यं प्राप्तव्यं भवति। एतदत्रावश्यं ध्येयं भवति यत् मूल्यानि संसारविकासप्रक्रियायाः उत्पन्नवस्तूनि न, प्रत्युत अलौकिकतत्त्वानि। मोक्षप्रापको धर्मः शिवसत्य-प्रतिनिधिश्चेत् कामप्रापयिताऽर्थः सत्यसुन्दरयोः प्रतिनिधिभूतः। शिवसत्ययुगलम् आध्यात्मिकञ्चेत् शिवसुन्दरमनुभवगम्यम्। प्रथमं युगलं मानवैः स्वजीवने किमधिगन्तव्यमिति सूचयति। द्वितीयञ्च युग्मं तैः सहजतया किं प्राप्तुमिष्यते इति च सूचयति। भारतीयं दर्शनं सकलमपि मूल्यविमर्शकमेव नान्यत् किमपीति **'आचार्य हिरियन्नस्य'** मतम्।

अतः भारतीयदर्शनानुसारं मूल्यं नाम पुरुषार्थः। धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्था मूल्यत्वेन परिगण्यन्ते अस्मद्दर्शनेषु तद्विवेचनमत्र प्रस्तूयते।

**पुरुषार्थः**

पुरुषस्य अर्थः पुरुषार्थ इति व्युत्पत्त्या पुरुषस्य प्रयोजनमित्यर्थोऽस्मात् लभ्यते स च चतुर्विधः। यथा अग्निपुराणे **''धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः''** तथैव मनुरपि- **''एतच्चतुर्विधं विद्यात् पुरुषार्थ-प्रयोजनम्''**।

**तत्र धर्मः** -

**''धरति लोकान् ध्रियते पुण्यात्मभिरिति वा''** इति धर्मः **हितोपदेशकारो** वदति-

**''एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति''।।**
**(हितोपदेशः-1/59)**

**पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्।**
**श्रद्धा बलिर्गवां ग्रासः षड्विधं धर्मलक्षणम्।**
**(पद्मोत्तरखण्डम्।)**

**धर्ममूलम्** - अद्रोहश्चाप्यलोभश्च दमी भूतदयापरः।

**कामः** - काम्यतेऽसौ इति कामः।

**मोक्षः** - मोक्ष्यते सुखदुःखादिसर्वमत्र इति मोक्षः

**न मोक्षो नभसः पृष्ठे न पाताले न च भूतले।**
**सर्वाशासंक्षये चेतः क्षमो मोक्ष इति श्रुते।।**
**(साङ्ख्यसारः 2/7/25)**

**धर्मः**

लोकेऽस्मिन् बहुपुण्यसापेक्षत्वेन दुःखलभ्यं नरत्वं धर्मादिसाधनोपायत्वेन सुसंस्कर्तुमेवास्मत्पूर्वजैः पुरुषार्थानां व्यवस्था विहिता। **'पुरुषैः अर्थ्यते उपयाच्यते योऽसौ'** इति पुरुषार्थः। जगति सर्वोऽपि आत्मनः सुखमीहते। तच्च सुखं तदैव लभते यदा तस्यावश्यकताः, इच्छाश्च पूर्णाः भवन्ति। एतद् ध्यात्वैव पुरुषार्थश्चतुर्विधः प्रकल्पितः-धर्मार्थकाममोक्षाश्चेति। अमी पुरुषार्थाः 'चतुर्वर्गः' इत्यपि अभिधीयन्ते।

तत्रादिमः पुरुषार्थोऽस्ति धर्मः। धर्म एव भारतीयसंस्कृतेः प्राणाः। अस्मत्संस्कृति-प्रतिनिधि-भूतानां वेदानां मूलं 'धर्मः'। समाजस्य धारणं पोषणञ्चायमेव करोति। असावेव मानवकल्याणं मोक्षाख्यं पुरुषार्थं च साधयति। समस्तमपि विश्वं सूत्रेणैकेन अयमेव बध्नाति। उक्तं खलु महाभारते-

**धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः।**
**यश्च धारणसंयुक्तः स धर्म इति निश्चयः।।**
(महाभारतकर्णपर्व 69.59)

मानवः धर्मेण प्रोन्नतिम् अधर्मेण चावनतिं प्रपद्यत इति धर्मस्य महत्त्वम्।

**'धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण।'**

वेदः स्मृतिः, सदाचारः, मनःप्रसादश्च धर्मस्य एव लक्षणानि इति मनुस्मृतौ याज्ञवल्क्यस्मृतौ च वर्णितम्-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।।**
(मनुस्मृतिः 2.12)

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।**

याज्ञवल्क्यस्मृतिकारिकया 'सम्यक् संकल्पजन्यः कामोऽपि धर्म इति ज्ञायते।'

**प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।**
**यः स्यात्प्रभावसंयुक्तः स धर्म इति मे मतः।।**
**अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम्।**
**यः स्यादहिंसया युक्तः स धर्म इति निश्चयः।।**
**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्।।**

इति व्यासमहर्षेः श्लोकानामाधारेण 'लोकहितम्' आत्महितञ्च धर्म इति।

स्वकर्त्तव्यपालनं धर्मः, अननुपालनं चाऽधर्मः। धर्ममनुपालयन् आत्मप्रशंसां चेत् कुरुते तर्हि धर्मस्य महत्त्वं नश्यति। उक्तं खलु **'धर्मः क्षरति कीर्तनात्'** इति। धर्म एव पशुभ्यो मानवं पृथक्करोति। धर्मस्याभ्युत्थानेन सुखप्राप्तिः, अधर्मस्याभ्युत्थानेन च दुःखप्राप्तिः। अतः सुखार्थी चेत् 'धर्ममाचरेत्।' तदुक्तं शुक्रनीतौ-

**सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः।**
**सुखं च न विना धर्मात् तस्माद् धर्मपरो भवेत्।।**
(शुक्रनीतिः 3.1)

स्वधर्मो रक्षणीयः, कदापि, क्वचिदपि, कथमपि स्वधर्मो न त्यक्तव्यः। स्वधर्मे गुणा न सन्तु नाम, परधर्मे गुणा भवन्तु नाम। स्वधर्मो रक्षणीयः खलु।

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्।**
(मनुस्मृतिः 8.15)

**श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।**
(भगवद्गीता 3.35)

मनुस्मृतिः, भवगद्गीता अस्मान् धर्माचरणाय उपदिशतः।

अहिंसा, सत्यम्, अस्तेयम्, शौचम्, इन्द्रियनिग्रहः, दया, क्षमा, आर्जवम्, दानम् एतानि धर्मसाधनानि। **'परोपकारः पुण्याय पापाय परपीडनम्' 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्'** इतीदं धर्मसर्वस्वम्।

इत्थं भारतीयसंस्कृतौ मूलरूपेण धर्मः प्रतिष्ठितः। धर्म एव पुरुषार्थचतुष्टये प्रधानः। धर्ममुपजीव्य इतरे पुरुषार्थाः प्रकाशन्ते।

**अर्थः**

यद्यप्यत्र भारतीयसंस्कृतौ भौतिकी आध्यात्मिकी चोन्नतिः समाना तथापि भौतिक्यै उन्नत्यै 'अर्थाख्यस्य पुरुषार्थस्य सेवनमनिवार्यमिति सर्वविदितमस्ति।' सर्वोऽपि लोकव्यवहारोऽर्थेनैव सिध्यति। तस्माल्लोकः अर्थं स्पृहयति। **'अर्थ्यते सर्वैरिति अर्थः'** इति अर्थशब्दस्य व्युत्पत्तिस्सार्थिका एव। 'आत्मनः भौतिकावश्यकतापूर्त्या सहैव धर्मकामौ पुरुषार्थावपि साधयेन्नरः'- इति अर्थाख्यस्यास्य पुरुषार्थस्याशयः। तदुक्तं **नीति-वाक्यामृताख्ये** ग्रन्थे- **'यतः सर्वप्रयोजनसिद्धिः स अर्थः'**- इति।

उक्तं च चाणक्यसूत्रेषु - सुखस्य मूलं धर्मः। धर्मस्य मूलम् अर्थः। वृत्तिमूलम् अर्थः। अर्थमूलौ धर्मकामौ। सुखेन जीवनं यापयितुमसौ पुरुषार्थः। संसारे सर्वस्यापि जनस्य चतस्रोऽवस्थाः धर्मशास्त्राणि प्रतिपादयन्ति। एतासु क्रमशः विद्याध्ययनं, धनार्जनं, तपश्चरणं, प्रमुखास्सन्ति। अतः बाल्ये विद्यार्जनं यथा अनिवार्यं तथैव यौवने धनार्जनं कुर्वन् मानवः स्वगृहस्थजीवने धर्मकामौ साधयेत्। अमुमेवाशयं द्रढयत्ययं श्लोकः। तथा हि-

**आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।**
**तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।।** इति।

तस्मादर्थोपार्जनं करणीयम्। अर्थोपार्जनं च व्यक्तिः स्वयोग्यताबलेनैव करोति। विद्यया स गुणी, योग्यश्च

भवति। तदीयगुणः योग्यता च धनार्जने तत्सहायौ भवतः। यद्यपि -

**दैवं फलति सर्वत्र न विद्या न च पौरुषम्।**
**पाषाणस्य कुतो विद्या येन देवत्वमागतम्।।**

इति लोके वादः प्रचलति। तथापि तावत्-

**न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः।**
**अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति।।**
**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।**
**तथा पुरुषकारेण विना दैवं न सिध्यति।।**
**उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।**
**विहाय पौरुषं यो हि दैवमेवावलम्बते।**
**प्रासादसिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः।।**
**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।**

इत्यादीनि सुभाषितानि उद्योगमहत्त्वपराणि चिरस्मरणीयानि सततमनुकरणीयानि च। अर्थादेव धर्मकाममोक्षाः सिध्यन्ति। विना स्त्रियं यथा गार्हस्थ्यं, विना शस्त्रास्त्राभ्यां यथा शौर्यं तत्पदवाच्यमन्वर्थकञ्च न भवति तथैवाऽर्थं विना अन्ये पुरुषार्थाः व्यर्थाः।

एवं नीतिशास्त्रविदः 'धनार्जनं' पुरुषस्य अनिवार्यं कर्म इति, तद्द्वारैव पुरुषार्थानां सिद्धिरिति धर्ममूलस्यै-वार्थस्य अर्जने यत्नो विधेय इति बहुधा मार्गमदर्शयन्। '**धर्ममूलः सदैवार्थः कामोऽर्थफलमुच्यते।**' परं '**महेन्द्रमपि अर्थहीनं न बहु मन्यते लोकः**' इति केचित् धनमेव जीवने प्रधानमिति भावयन्तः तदर्जनलालसायुक्ता युक्तायुक्तं विस्मृत्य धनप्रशंसां विदधति। तथा हि -

**यस्यास्ति वित्तं स नरः कुलीनः**
**स पण्डितः स श्रुतवान् गुणज्ञः।**
**स एव वक्ता स च दर्शनीयः**
**सर्वे गुणाः काञ्चनमाश्रयन्ति।।** (नीतिशतकम्,41)

अर्थबलेनैव जनो दुर्बलोऽपि बलवान् भवति। धनेन विना सबलोऽपि निर्बलो भवति। तदीया बुद्धिः नश्यति। तदनादरः सर्वत्र भवति। दरिद्रः सन् स लोके दैन्यं जीवनं लभते। 'द्रारिद्र्यं खलु नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्'- इति **महाकविः भासः** स्वीये 'चारुदत्तं' इति नाटके धनं विना कियद् दुःखं भवतीति, तदभावे नायकस्य चारुदत्तस्य जीवनं कथमिति चाभिवर्णयति-तथा हि-

**सुखं हि दुःखान्यनुभूय शोभते**
**यथान्धकारादिव दीपदर्शनम्।**
**सुखात्तु यो याति दशां दरिद्रतां**
**स्थितः शरीरेण मृतः स जीवति।।**

अर्थाख्यस्य पुरुषार्थस्यास्य '**धनरूपोऽर्थो न केवलं मन्तव्यः**' अपि तु भूमिर्विद्या, स्वर्णम्, पशवः, धान्यं, पात्रादीनि चेति 'कामसूत्रे' वात्स्यायनोऽर्थं स्पष्टयति। एतेषामर्जनं नित्यं मनुजः कुर्यादिति च कौटिल्य-शुक्राचार्यप्रभृतयो नीतिशास्त्रविशारदाः प्रवदन्ति।

समाजे जीवनयात्रानिर्वाहाय यद्यपि भौतिकोन्नत्यै च अर्थः साधनमस्ति तथापि धर्ममूलोऽर्थः आध्यात्मिकोन्न-त्यै साधनं भवति। अतो धनार्जनक्रमे मानवस्य नैतिकं पतनं न स्यात्। अर्थोपार्जनस्य भोगविलास एव लक्ष्यं न स्यात्। अपि तु 'धर्मपुरुषार्थसिद्धिः लक्ष्यं स्यात्' धर्मपूर्वकमेव धनं सुखप्रदं भवति। न्यायार्जितमेव वित्तं समाजे समादृतं भवति। तस्मात् 'अर्थाख्यः पुरुषार्थः कदापि कथमपि कथञ्चिदपि, केनापि न उपेक्षणीयः।' यतः-

**अर्थो नराणां गतिरङ्गनानां**
**वर्षा नदीनाम् ऋतुराट् तरूणाम्।**
**स्वधर्मचारी नृपतिः प्रजानां**
**गतं गतं यौवनमानयन्ति।।**

**कामः**

कामो मानवजीवनस्य तृतीयः पुरुषार्थः । पुरुषार्थेषु धर्मार्थयोर्यावत्प्राधान्यं तावदेवाऽस्यापि विद्यते। 'काम्यत इति कामः', इत्यनया व्युत्पत्त्याऽखिलेच्छानां ग्रहणं

भवति। कामपदेन, यासां पूर्त्या मानवो सन्तोषमनुभवति। मनस्तोषकरः काम इति कथने नास्ति दोषः।

सोऽयं कामो द्विविधः। धर्ममूलोऽधर्ममूलश्चेति। तत्र स्वाभिलषितैन्द्रियसुख-भोगावाप्तये धर्मानुकूलो व्यापारः प्रथमः। असावेव पुरुषार्थाभिधानः 'कामपदवाच्यो भवति। स्वेप्सितं पदार्थमासाद्य या तृप्तिरुत्पद्यते सा काम इति व्यपदिश्यते। कामप्राप्तिः पुण्यकर्मणामुत्तमं फलमिति मन्यते। तदुक्तं महाभारते' -

**द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते।**
**स कामश्चित्तसङ्कल्पः शरीरं नास्य दृश्यते।।**
**इन्द्रियाणां च पञ्चानां मनसो हृदयस्य च।**
**विषये वर्तमानानां या प्रीतिरुपजायते।**
**स काम इति मे बुद्धिः कर्मणां फलमुत्तमम्।।**

(महाभारतम्, 3.33.37)

सर्वलोकानां मनसि बुद्धौ च कामो वसति। तेषां मानसिकसङ्कल्पपरिणाम एव कामः। अधर्ममूलः सोऽयं कामः तदिच्छाभावेऽपि तं पापकर्मणि प्रवर्तयति। कामः सदा बुभुक्षितः सन् पापे प्रवर्तते। कियतापि भोगेन तृप्तो शान्तश्च न भवति। यथेन्धनैः घृतेन चाग्निः कदापि शान्तः न भवति प्रत्युत प्रज्वलति, तथैवायं कामः भोगैः सह न कदापि शान्तो भवति। किन्तु वृद्धिं परामेति। एष कामो विषयाणामुपभोगपरोऽधर्ममूलः सन् मानवस्य शत्रुर्विद्यते। मनुष्यस्य ज्ञानविज्ञाने परिवृत्यासौ तत्कल्याणं ध्वंसयते। अतो न कश्चिदप्यस्याधीनः स्यात्।

जगति सर्वस्यापि जनस्य 'षट्' रिपवः प्रसिद्धाः। यथा-कामः, क्रोधः, लोभः, मोहः, मदः मात्सर्यं चेति। तत्रादिमः मुख्यश्चास्ति 'कामः'। कामादेव इतरेषां शत्रूणामुद्भवः। कामात्क्रोधः, क्रोधात्सम्मोहः, सम्मोहात्स्मृतिविभ्रमः इत्येवमन्यान्यविकारजननं भवति। अतः कामो मुख्यः। एष एव मनुष्यप्रेरकः। कामो नाम- 'स्त्रीविषयिणी भोगभावना' इति सामान्यार्थः। एतदतिरिक्तं कामस्यार्थोऽस्ति 'इच्छा' इति।

**कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।**
**स नो बन्धुमसति निरभिन्दन् हृदा प्रतीच्या कवयो मनीषा।**

- ऋग्वेदः, 10.129.4

सृष्टिप्रारम्भकाले परमेश्वरस्य मनसो यद्वीर्यं निःसृतं तदेव 'कामः'। कामस्यार्थोऽस्ति सर्जनं विधातुमिच्छा, कार्यं कर्तुमिच्छा स्वशक्तेः प्रदर्शनेच्छा, निवृत्तिं परित्यज्य प्रवृत्तिमागन्तुमिच्छा। एष काम एव गृहस्थाश्रमवासिषु स्त्रियं प्राप्तुम् इच्छारूपेण प्रकट्यते। सन्तानोत्पादनेच्छा-रूपेणापि अस्य कामस्यांशः कश्चिदेतेषु निवसति।

सत्त्वं रजः तमश्चेति त्रयो गुणाः प्रसिद्धाः। तत्र 'रजोगुणात् भोगवृत्तिः एधते।' असह्या भोगतृष्णा जायते फलासक्तिरुपजायते, भोगावाप्तये कर्म भवति। मनुष्यो क्षुब्धो भवति। मनश्चाशान्तं भवति। सर्वाणि सुखानि मे भवन्त्विति प्रतीतिर्जायते।

अनया प्रवृत्त्या दुःखमेव भृशं वर्धते। भेदकल-हावुत्पद्येते। महता परिश्रमेण भोगसम्पादनप्रयत्नो भवति। हिंसावृत्तिरेधते। अपवित्रता भवति। क्षणे हर्षो क्षणे च शोकः। धर्माधर्मयोर्विचार एव नोपजायते। कर्त्तव्या-कर्त्तव्ये न दृश्येते। असत्यं हि सत्यमिव प्रतीयते।

विषयेषु भोगासक्तिरभिवर्धते। अमी विषयाः प्रारम्भे मोहरूपमाहृत्य सुखं जनयन्ति, अन्ते च विषमिव नाशकाः सिद्ध्यन्ति। इत्थं रजोगुणादेव कामस्योत्पत्तिः।

सोऽयं कामो ज्ञानिनः वैरी। यथा सूर्येण सह अन्धकारस्य शत्रुता, तथैव ज्ञानेन साकं कामस्य वैरिता। यो ज्ञानी स कामं नाशयति। 'कामदहनाख्या पौराणिकी कथाऽत्र स्मरणीया।' अतो यत्र ज्ञानं न तत्रास्ति अधर्ममूलः कामः। यत्र च कामो न तत्रास्ति ज्ञानमिति सत्यमवधेयम्। अत एव ब्रह्मचर्याश्रमे कामस्य निष्ठुरतापूर्वकं विरोधः। ज्ञानस्य मनः बुद्धिश्चेति मुख्यमिन्द्रियद्वयमास्ते। एतद् द्वयं यदि कामम् आवृणोति तर्हि तत्र मूढता एव व्याप्नोति। यथा शत्रुसैन्यं दुर्गमावृणोति अन्तः स्थानां वीराणां सञ्चारश्च

रुणद्धि तथैवात्र कामः मनः बुद्धिं चावृत्य तयोः स्वातन्त्र्यं नाशयति। कामाधीनं तदिन्द्रियद्वयं काममनुधावति।

कामोऽयमनलरूपः। नित्यमेषः शमनीयः यद्यस्मिन् भोगेन्धनं विषयसुखानां घृतं च पात्यते तर्हि नितरां प्रदीप्तो भवत्यसौ। अतः संयमदम-निग्रहरूपं जलमस्योपरि सेचनीयम्। वैराग्याश्मनि अयं स्थापनीयः। तदासौ शान्तो भवति। तस्मात् सदा मनुष्यः सावधानो भवतु, कामाधीनो मा भवतु इति गीतोपदेशः। तथाहि-

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।**

एवं 'कामः' धर्माविरुद्धः सन् 'पुरुषार्थाभिधाम् अधिगच्छति। यद्यपि पूर्वोक्तप्रकारेण' 'काम' विषये भारतीयमनीषिणामुपदेशोऽनुकरणीयो विद्यते तथापि 'सङ्कल्पसूर्योदय' कथनानुसारेणास्मिन् लोके सर्वकालेषु सर्वावस्थासु मनुष्यः कामस्य वशे भवत्येव इति निश्चप्रचम्। यथा-

**कामोऽसौ समवर्तताग्र इति हि ब्रूते समीची श्रुतिः**
**कामादेव जगज्जनिस्थितिलयैराद्यः पुमान् क्रीडति।**
**निष्कामोऽपि सकाम एव लभते निःश्रेयसं दुर्लभं**
**कामः कस्य वशे, क एष भुवने कामस्य न स्यात्**
**वशे।।** (सङ्कल्पसूर्योदयः)

अनेनायमप्यर्थः सिध्यति 'कामः पूर्णरूपेण न त्याज्यः न वा पूर्णरूपेण ग्राह्यः द्वावपि मार्गावनुचितौ। अतः धर्मार्थयोरनुकूलरूपेण कामः सेवनीयः तेनैव मानवाभ्युदयः स्थिरो भवति।'

**मोक्षः**

**पुरुषार्थेषु मोक्ष एव परमः पुरुषार्थः।** एष निर्विवादः। धर्मार्थकामाः संसारं प्रति व्यक्तिं प्रवर्तयन्ति। मोक्षस्तु संसारबन्धान्निवर्तयति। इदमेव निदानं यन्मुक्तये विभिन्नधर्मसम्प्रदायाश्च सदैव साधनामामनन्ति। मन्त्र-तन्त्र-यन्त्रैर्वा मोक्षप्राप्तिर्न भवितुमर्हति। अमी मोक्षप्राप्ति-साधने साहाय्यं केवलं विदधति। **'वैराग्यं हि ज्ञानस्य मुख्यं साधनम्।'** तस्य च प्राप्तये वर्णाश्रमधर्मपालनम-निवार्यम्।

संसारोऽयं सागर इति समुद्घोषयन्ति विपश्चितः। संसारसागरेऽस्मिन् कर्मविपाकस्य बलीयस्त्वात् दुःखं प्रतिपदं समापतत्येव। दुःखोदधौ निमग्नः धैर्यमेवाव-लम्बयेत्। आत्मशक्त्या दुःखं निरसितुं शक्यते। आत्मशक्तिर्हि सर्वोदयस्य मूलम्। इयं चात्मशक्तिर्ज्ञानेन भवति। ज्ञानाग्निना अनेन सर्वकर्मप्रदाहे मोक्षावाप्तिः भवति।

जीवनमेतन्न केवलं भोगार्थमेव अपितु आत्मोन्नतेः प्रमुखं साधनम् इति भावना मानवं देवत्वं प्रापयति। तदन्वितो जनः सर्वभूतेषु एकत्वं समीक्षते। जगदिदं सर्वनियन्त्रा, सर्वाधिपतिना, सर्वशक्तिमता, सर्वज्ञेन, सर्वकल्याणगुणस्वरूपेण परमात्मना व्याप्तम् इत्यव-गच्छति।

**'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्'**
**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।**
**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।।**

इति ईशोपनिषद्वाक्यैः सर्वत्रैकत्वदर्शनेन मानवः शोकम् अतितरिष्यति।

एवं जन्ममृत्युभ्यां मुक्तिः, संसारबन्धनान्मुक्तिः, सर्वविधेभ्यो दुःखेभ्यो मुक्तिः, परमात्मस्वरूपज्ञानम्, आत्मपरिज्ञानं, सर्वाशानां विनाशश्च मोक्ष इति व्यपदिश्यते।

वर्णाश्रमधर्मपालनेन मनः शुद्धं भवति। तदा अर्थकामाभ्यां वितृष्णा जायते। धर्मस्य फलं वरमिति विज्ञाय धार्मिकः पुरुषो अर्थमेव न यत्किञ्चिदपि त्यक्तुमुद्यतो भवति। धर्मादर्थकामौ सिध्यत इति स्वाभाविकम्। परम् अर्थाद् धर्मसिद्धिरसम्भवा। अर्थो हि मनुष्यं कृपणं विधत्ते। अर्थकामयोरासक्तः पुरुषो न

कदापि धर्ममधिगन्तुं प्रभवति, प्रत्युत सः फलासक्त्या कर्म कुरुते अहङ्कारं न त्यजति। कर्मदोषैश्च यदा दुःखी भवति, यदा च तद् दुःखमसह्यं भवति। तदाऽसौ ईश्वरमेव निन्दति। यदि सुखं भवति तर्हि नामापि न स्मरति। ईदृशयोः सुखदुःखयोरीश्वरो हेतुरिति मानवस्येदं कथनं तदज्ञानमेव व्यनक्ति। सर्वेऽपि दोषाः मानवस्य अहङ्कराज्ञानाभ्यामेव। यो यथा कर्म कुरुते स तथा फलमश्नुते। अतो मानवः 'आत्मनः' अज्ञानजं दोषमितरेषु आरोपयति। यदा च ज्ञानं भवति तदा तद् 'अज्ञानं' नाशयति। यथा लोके प्रकाशागमनेऽन्धकारस्य नाशस्तथैव ज्ञानोदयेऽज्ञानस्य नाशः। ज्ञानशब्दोऽत्र परमात्मनः सम्बद्धं ज्ञानम् अभिसूचयति। 'मोक्षधीर्ज्ञानम्' इति मोक्षविषयकं ज्ञानमभिस्थापयति। अनेन ज्ञानेनै-वात्मनोऽज्ञानमपनीयते। व्यपगते च अज्ञाने असौ सदा तस्य सर्वव्यापकस्य परमेश्वरस्य परमं पदं पश्यति। यथा नभसि सूर्यो दृश्यते तथैव तत्र परमेश्वरो दृश्यते। यदुक्तम् ऋग्वेदे -

**तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।**
**दिवीव चक्षुराततम्।।** (ऋग्वेदः, 1/22)

**भगवद्गीतायाञ्च -**

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**
**तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।**

जिज्ञासुना प्रथममस्मै ज्ञानाय सज्जता करणीया भवति। गुरुमुखाद् ध्यानपूर्वकं सारभूतं ज्ञानं प्राप्नुवन् साधनामाचरेत्। अत एवोक्तं-

**यत्सारभूतं तदुपासितव्यम्।**
**सारभूतमुपासीत ज्ञानं यत् स्वार्थसाधकम्।।**
**अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः।**
**सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः।।**

आत्यन्तिकदुःखनिवृत्तिः परमात्मनः प्राप्तिश्च 'मोक्ष' इत्यभिधीयते। योऽयं मोक्षः चतुर्भिरन्तरङ्गसाधनैः साध्यते। तानि च साधनानि विवेकः, वैराग्यं, षट्सम्पत्तिः, मुमुक्षुता इति प्रसिद्धानि। तत्र 'विवेको' नाम सदसद्विवेचनम्। विवेकोदयात् वैराग्यं, त्यागप्रभृतयो उत्तरोत्तरं भावाः प्रजायन्ते। 'वैराग्यं' नाम 'ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः' इति। ब्रह्मलोकं यावत् सर्वपदार्थानां तृणवदवगमनमेव वैराग्यम्।

'षट्सम्पत्तिः' षट्सम्पदः सन्ति शमः, दमः, श्रद्धा, समाधानं, तितिक्षा, उपरतिश्चेति। मनोनिरोधः शमः। इन्द्रियनिग्रहो दमः, वेदशास्त्र-गुरु-साधनेषु विश्वासः श्रद्धा, समाधानं नाम मनसः सर्वथा स्थिरत्वम्, शीतोष्णयोः सुखदुःखयोः सहनं तितिक्षा। उपरतिस्तु सांसारिक-पदार्थेभ्य उपरमः। चतुर्थं साधनमस्ति मुमुक्षुत्वम्। संसारचक्रात् मुक्तेरिच्छा एव। एतेषां चतुर्णां साधनानां ज्ञानादपि मोक्षो भवति। यथा चोक्तं-

**'दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्'** इति।

एवं ज्ञानेन विना मोक्षावाप्तिर्नास्ति। तस्मिन्नपि ज्ञाने निष्कामरूपो धर्मः स्यात्। यदुक्तं भगवता-

**'युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्'** इति। धर्मफलस्याननुसन्धानादेव तदधी-नोत्पत्तिकयोरर्थकामयोरुत्पत्तिसम्भावनैव नास्तीति तयोरनुपादानम्। **'तरति शोकमात्मवित्' 'ब्रह्मविद् ब्रह्मैव भवति' 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाय'** इति श्रुतेः, **''आत्मानं चेद्विजानीयादयमस्मीति पूरुषः''** इत्यादिस्मृतेश्च मोक्षो ब्रह्मज्ञानेनैव भवतीति स्पष्टं प्रमाणम्। समदर्शनमपि ज्ञानिनः लक्षणं भवति।

इत्यनया रीत्या मूल्यशिक्षायै अमी पुरुषार्थाः महदुपकुर्वन्ति। अस्माकं संस्कृतौ एते मेरुदण्डवत् राजन्ते।

**सहायकाचार्यः, शिक्षाविभागे**
**ज.रा. राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

पुस्तकसमीक्षा

# नूतनं छन्दः शास्त्रम्

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

सुरभारत्यां छन्दसां सुविशालो निधिरस्तीति सुविदितं विदुषाम्। वेदकालादाधुनिककालपर्यन्तं विविधेषु छन्दःसु काव्यरचना विहिता कवितल्लजैः, वेदेषु यथा गायत्री-अनुष्टुप्-त्रिष्टुप् प्रभृतीनामक्षरिकच्छन्दसां भूयसी संख्या परिदृश्यते तथा काव्येषु शार्दूलविक्रीडितो पजातिशिखरिणी-मन्दाक्रान्तप्रभृतीन्यनेकानि छन्दांसि शताब्दीभ्यः प्रयुक्तानि (वार्णिकच्छन्दांसि) वर्धयन्ति गीर्वाणवाणीभाण्डागारम्। एतदतिरिक्तं प्राकृतेभ्य आर्याप्रभृतीनि मात्रिकच्छन्दांस्यपि परिगृहीतानि समेधयन्ति देववाणीसाहित्यम्। छन्दःशास्त्रस्य पठन-पाठनादीनां कृते वृत्तरत्नाकर-छन्दो-मञ्जरीप्रभृतीन्यनेकानि पुस्तकान्यप्युपलभ्यन्ते

तदिदं ज्ञात्वा नूनं विशिष्टमानन्दमिश्रितमाश्चर्य मनुभविष्यन्ति विद्वांसो यत् सुप्रथितेन कविसार्वभौमेन, राष्ट्रपतिसम्मानितेन, संस्कृतविश्वविद्यालयकुपतिपद-मलङ्कृतवता विद्वन्मूर्धन्येन प्रो. अभिराजराजेन्द्रमिश्रेण छन्दः शास्त्रस्यैको नूतनो ग्रन्थः प्रणीतोऽस्ति यत्रानेकानि नूतनानि च्छन्दांसि सृष्टानि, तेषां लक्षणोदाहरणादीन्यपि प्रस्तुतानि। प्रायो वर्षदशकत्रयात् पूर्वं (पूर्वं 1987-89) बालीद्वीपीय प्रवासावधौ विद्वद्वरेणानेन छन्दःशास्त्र-विधायकः सोऽयं ग्रन्थो विलिखतोऽभूत् पद्येषु किन्तु दुर्भाग्यवशात्तस्य पाण्डुलिपिर्यात्रायां कुत्रचन विलुप्ता। सम्प्रति ग्रन्थस्यास्य (सृष्टनष्टस्य) पुनर्लेखनं यत् कृतं लेखकेन तत्प्रकाशितमस्ति "छन्दोऽभिराजीयम्" शीर्षकेणेति महान् प्रमोदः।

ग्रन्थेऽस्मिन्नध्यायत्रयमस्ति। प्रथमेऽध्याये मगण-जगणादिगणानां, लघुत्व-गुरुत्वादिसिद्धान्तानां, यतिप्रभृतीनां, मात्रिक-वार्णिकादिभेदानां च सिद्धान्ता वर्णिताः सन्ति, द्वितीयेऽध्यायेऽनेकेषां नूतनानां छन्दसामवतारणा कृताऽस्ति। सोऽयमध्यायो नूतनं किञ्चिदितिहासं विरचयतीति दृष्ट्वा विस्मयः स्यादनेकेषाम्। प्राचीनेषु छन्दःसु किञ्चित् परिवर्तनं विधाय नूतनानि छन्दांसि सृष्टानि विद्वत्प्रवरेण, लघु-गुरुवर्णानां भगण-रगणादीनां च स्पष्टानि विधानानि परिकल्प्य नवीनानि च्छन्दांसि नूतनैर्नामभिः प्रस्तुतानि नवीनामेव सृष्टिं प्रदर्शयन्ति। (यथा रेवाच्छन्दो रेवाप्रसादद्विवेदिवर्याणां, मञ्जुनाथच्छन्दो भट्टमथुरानाथ-शास्त्रिमञ्जुनाथवर्याणां, श्रीनिवासच्छन्दः श्रीनिवास-रथवर्याणां नाम्ना सृष्टोऽस्ति।)

एवंविधानां नूतनानां 51 (एकपञ्चाशत्) छन्दसां सृष्टिं कृत्वा तेषां लक्षणोदाहरणानि द्वितीयेऽस्मिन्नध्याये प्रस्तुतानि नूतनं कञ्चिच्छन्दपरिवारं प्रकटयन्ति।

तृतीयेऽध्याये प्राचीनानां छन्दसां परस्परमिश्रणेन किञ्चित् परिवर्तनानि विधाय तेषामेव पुनः प्रस्तुतीकरणेन यानि सङ्कीर्णच्छन्दांसि कल्पयितुं शक्यन्ते, तेषां प्रस्तुतीकरणमस्ति। एतदपि नूतनां दिशं प्रदर्शयति। इत्थं छन्दसामुपजातिः प्रस्तोतुं शक्यते इति ग्रन्थकारस्य स्थापनाऽस्ति। एतेषामपि लक्षणोदाहरणादीनि प्रस्तुतानि तृतीयेऽध्याये। नव उपजातय एवं प्रदर्शिताः।

इत्थं नूतनोऽयं छन्दःशास्त्रग्रन्थो नवीना दिशः प्रकटयतीति दृष्ट्वा विस्मयहर्षादीनां भावशबलता निश्चितमेवानुभूता भवेत् सुधीभिरिति स्पष्टमेव। छन्दः-शास्त्रस्येतिहासे नवीनमध्यायं योजयतोऽस्य ग्रन्थ-स्यावतरणोपलक्ष्ये वर्धापयामो विद्वत्तल्लजं प्रो. अभिराज राजेन्द्रमिश्रम्।

**छन्दोऽभिराजीयम्: प्रणेता: प्रो. अभिराज राजेन्द्र मिश्रः, प्रकाशकः वैजयन्त प्रकाशन 8 बाघम्बरी मार्ग, प्रयागराज (उ.प्र.) पृ.सं. 50 मू. 300/-.**

## पाक्षिकी संस्कृतपत्रिका

संस्कृतपत्रपत्रिकाणां साधीयसी संख्याऽद्यापि भारते पाठकान् प्रमोदयतीति हर्षस्य विषयः। एतासु मासिक-त्रैमासिकादिपत्रिकास्तु सन्त्येव, साप्ताहिक-दैनिक-पाक्षिकादिपत्रिका अपि सन्ति। देहलीतः प्रकाश्यमाना पाक्षिकी पत्रिका "**संस्कृतवाणी**" प्रसरत्यद्यापि। अस्यां हि संस्कृतजगतो वार्ताः (समाचाराः) अपि प्रकाश्यन्ते शोधात्मकाः सर्जनात्मकाश्च लेखा अपि, काव्यरचना अपि, पुस्तकपत्रेषु सचित्रं, समाचारपत्र-स्वरूपे विशालाकारे मुद्रयमाणमिदं पाक्षिकं पत्रं प्रमोदयति नियमितरूपेण पाठकान्।

**संस्कृतवाणी (पाक्षिकम्) : प्रधानसम्पादिका डॉ. लक्ष्मी शर्मा, सम्पादकः जीवन शर्मा, प्रकाशकः गोविन्दाचार्यः, 107, रामानुज मार्ग, इब्राहिमपुर गाँव, दिल्ली-110096 पृ.सं. 8 मूल्यम् 5/- द्विवार्षिक शुल्कम् 500/- पञ्चवार्षिकम् 1100/-, दशवार्षिकम् 2100/-.**

**प्रेरकप्रसङ्गशतकम्** **नवतितमः प्रसङ्गः**

# परिवारयोजनमतीव दुष्करम्

**❑ सौ. आराधना धर्माधिकारी**

भवत्यपि आश्चर्यं जनयन्ति मातः। तातचरणाः भवत्यै क्रुध्यन्ति, आक्रोशं कुर्वन्ति, अपमानं कुर्वन्ति, एतावदेव न अपशब्दमपि वदन्ति परं भवती मौनेन सर्वं सहते। सर्वं शृणोति अथापि भवती तत्क्षणं सेवायामुपतिष्ठति। ते भाषणं त्यजन्ति तदापि भवत्येवाग्रे आगत्य मानयन्ति। मादृशी स्यात्तदा तु गच्छतु क्वापि स्वेच्छया। अहं त्विदं सर्वं सोढुं नैव शक्नोमि। रोमा विकृतमुखाकृतिं विधाय स्वश्व-श्रूमवदत्। श्वश्रूरवदत् वदतु नाम, पुत्रि! अद्यतो तु न शृणोमि पंचचत्वारिंशद्वर्षाणि व्यतीतानि शृण्वंत्या मे। पादाङ्गुष्ठे स्थापितास्म्येतैरहम्।

अस्य दायित्वमपि भवत्यामेवायाति। भवती स्वावलम्बिनी नासीत्। अत एव भुक्तं भवत्या। अत एव च भवती विभेति। अद्यतनीया बाला नेदं सर्वं सोढुं शक्नोति। वार्तां निषेधयन्त्या रोमया कथितम्।

श्वश्र्वा कथितम्-नैतादृशी वार्त्ता पुत्रि ! मेऽप्यर्जनमेभिस्तुल्यमेवासीत्। अहमेव न मादृशीः शतशो महिलाः याः सत्यामभिलाषायां पतिं त्यक्तुं समर्थाः परं तदा तु न परिवाररक्षा स्यान्न च महिला सम्मानकर्त्तृणां त्वत्पतिसदृशानां बालकानां जन्म भवेत्। परिवारभङ्गः पतित्यागश्च सरलः। परिवारयोजनं महद्दुष्करम्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

नारी-स्तम्भः

# नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत

❑ डॉ. राजेश्वरी भट्ट

वर्तमाने समये अस्माकं राष्ट्रं जनसंख्यावृद्धि-पर्यावरण-प्रदूषण-अशिक्षा-नार्युत्पीड़नादिभ्यो याभ्यो विस्फोटकरीभ्यः समस्याभ्यो ग्रस्तं, त्रस्तञ्च दृश्यते ताभ्यो विभीषिकाभ्यो लोकं त्रातुं सावहितञ्च कर्त्तुं शास्त्राणि क्रान्तदर्शिनो ऋषयश्च जागरूकाः प्रयत्नवन्तश्च दृश्यन्ते। अस्मिन् सन्दर्भे महाभारत-ग्रन्थरत्ने बहुसन्तानोत्पत्तिविरोधे स्वरमुत्थापयन्त्या दूरदर्शिन्याः पाण्डुपत्न्या देव्याः कुन्त्याः वचनान्यत्र विमर्षणीयानि प्रेरणामयानि च सन्ति। जानन्त्येव भवन्तः यन्महर्षेः दुर्वाससो वरदानेन दिव्यस्वरूपा पाण्डुपत्नी कुन्ती सन्तानाभा-वेनातुरेण सहचरेण पाण्डुना कृतेनानुरोधेन च धर्मराज-वायु-इन्द्राणां त्रिदेवानामाह्वानं कृत्वा ह्येषां प्रसादेन युधिष्ठिर-भीम-अर्जुन इति त्रिपुत्रान् प्राप्तवती। तेजस्विनः त्रीन् पुत्रान् प्राप्यापि नृपः सर्वथा अपूर्णकाम इव आत्मानममन्यत। ततः पुत्र- लोभाविष्टः पाण्डुः पुनः देवस्य कस्याप्यन्यस्य आह्वानं कृत्वा चतुर्थसन्ततेः प्राप्त्यर्थं राज्ञीं कुन्तीं किञ्चिद् ब्रवीतुं समुत्सुकोऽभवत् किन्तु किञ्चिदपि कथनात्पूर्वं मनोज्ञा कुन्ती स्वामिनः पाण्डोः अभीष्टं ज्ञात्वा तं वारयन्ती अब्रतीत्-

पाण्डुस्तु पुनरेवैनां पुत्रलोभान्महायशाः।
वक्तुमैच्छद् धर्मपत्नीं कुन्ती त्वेनमथाब्रवीत्।।

महा.। आदि.। सम्भव/122/76

सीमितपरिवार एव सुखस्य मूलं स्वीकुर्वती गृहलक्ष्मीः कुन्ती पाण्डोरभिलाषम् उचितं नाऽमन्यत। शास्त्रवचनानि समर्थयन्त्याः परिवार-कल्याण-कामिन्याः कुन्त्या दृष्ट्या चतुर्थसन्ततेर-भिलाषिणी स्त्री स्वैरिणी भवति तथा पञ्चसन्ततीनां माता कुलटा कथ्यते। शास्त्रैरापत्स्वपि चतुर्थं प्रसवं वाच्यं कथयन्ति सुधियः।तथा हि-

नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत।
अतः परं स्वैरिणी स्यात् बन्धकी पञ्चमे भवेत्।।

महा.। आदि.। सम्भव/122/77

तथापि चतुर्थपुत्रस्य प्राप्त्यर्थं पत्नीं कुन्तीं वारं वारं प्रेरयन्तं, शास्त्रसम्मतानि वचनान्यतिक्रामन्तं पतिं पाण्डुं स्वाभीष्टाद् वारयन्ती विदुषी कुन्ती कथयति-

स त्वं विद्वन् धर्ममिममधिगम्य कथं नु माम्।
अपत्यार्थं समुत्क्रम्य प्रमादादिव भाषसे।।

महा.। आदि.। सम्भव/122/78

लोकव्यवहारनिष्णातायाः परिवारसाधिकाया गृहलक्ष्म्याः शास्त्रसम्मतानि वचनानि दुराग्रहिणः आतुरस्य पाण्डोः कृते शंकराणि जातानि। सन्तुष्टः पाण्डुः पत्न्या वचनेन सम्मतोऽभवत् अकथयच्च-

एवमेतत् धर्मशास्त्रं यथा वदसि तत् तथा। दृश्यते यत् सम्प्रति शास्त्रवचनानामुपेक्षया संस्कृतेराचार-संहिताया उल्लंघनेन जनाः स्वेच्छाचारिणोऽभवन्। प्रतिक्षणं वर्द्धमाना जनसंख्या राष्ट्रकृते विस्फोटकरी जाता। उत्तरोत्तरं वृद्धिं प्राप्तानां मानवानां कृते, आवास-भोजन-शिक्षा-आजीविकादीनां साधनानां

**व्यवस्था न केवलं परिवारस्य कृते अपितु सर्वकारस्य कृतेऽपि दु:साध्या वर्तते। राष्ट्रस्य सुसम्पन्नतायै आर्थिकस्थितिजनसंख्ययोर्मध्ये सन्तुलनमनिवार्य-मस्ति। अनियन्त्रितगत्या वर्द्धमाना जनसंख्या राष्ट्रस्य कृतेऽहितावहा।**

## हिन्दी अनुवाद

वर्तमान समय में हमारा राष्ट्र जनसंख्या वृद्धि-पर्यावरण प्रदूषण-अशिक्षा-नारी उत्पीड़न आदि जिन विस्फोटकारी समस्याओं से ग्रस्त-त्रस्त एवं अस्तव्यस्त है उन समस्याओं से लोक को बचाने के लिए एवं सावधान करने के लिए शास्त्र तथा त्रिकालज्ञ ऋषि युग युग से जागरूक एवं प्रयत्नशील हैं। इस सन्दर्भ में महाभारत ग्रन्थ रत्न में अधिक सन्तानोत्पत्ति के विरोध में आवाज उठाने वाली दूरदर्शिनी पाण्डुमहाराज की पत्नी दूरदर्शिनी देवी कुन्ती के वचन विचारणीय हैं। स्पष्ट है कि महर्षि दुर्वासा के वरदान से दिव्यस्वरूपा पाण्डुपत्नी कुन्ती ने, सन्तान के अभाव से व्याकुल अपने पति पाण्डु के अनुरोध से धर्मराज, वायु तथा इन्द्रादि तीन देवताओं का आह्वान किया एवं उनकी कृपा से युधिष्ठिर, भीम, एवं अर्जुन, इन तीन पुत्रों को प्राप्त किया। तीन तेजस्वी पुत्रों को प्राप्त करने पर भी पाण्डु की इस विषय में इच्छा अपूर्ण ही रही। अत: लोभ से ग्रस्त पाण्डु ने अन्य किसी देव का आह्वान कर चतुर्थ सन्तान प्राप्ति के लिए कुन्ती को प्रेरित करने का विचार किया किन्तु पाण्डु के कुछ कहने से पूर्व ही पति पाण्डु के अभीष्ट को जानकर उनको रोकती हुई कुन्ती ने पति पाण्डु की अभिलाषा को उचित नहीं समझा। सीमित परिवार को ही सुख का मूल मानने वाली तथा शास्त्र वचनों का समर्थन करने वाली कल्याण-कामिनी कुन्ती की दृष्टि में चतुर्थ सन्तान की अभिलाषा करने वाली स्त्री 'स्वैरिणी' तथा पाँचवी सन्तान की माता 'कुलटा' कही जाती है। आपत्तिकाल में भी पाँचवी सन्तान निन्दनीय मानी गई है। पत्नी कुन्ती के द्वारा बार-बार समझाए जाने पर भी शास्त्र सम्मत वचनों की उपेक्षा करने वाले पति पाण्डु को अपने धर्म का स्मरण दिलाती हुई कुन्ती पुन: चतुर्थ पुत्र की प्राप्ति रूप मनोरथ से रोकती हुई कहती है :-हे विद्वन् ! आप धर्म को जानते हुए भी प्रमाद के कारण धर्म का लोप कर मुझे सन्तानोत्पत्ति के लिए क्यों प्रेरित कर रहे हैं ? लोक व्यवहार में निपुण एवं परिवार साधिका गृहलक्ष्मी कुन्ती के शास्त्र सम्मत वचन दुराग्रह से आतुर पति पाण्डु के लिए सन्तोषजनक सिद्ध हुए। पाण्डु ने धर्मशास्त्र सम्मत वचनों पर तथा पत्नी के विचारों से सहमति प्रस्तुत की। किन्तु वर्तमान समय में शास्त्र वचनों की उपेक्षा एवं संस्कृति आचार संहिता के उल्लंघन से मानव स्वेच्छाचारी हो रहे हैं। प्रतिक्षण बढ़ती हुई जनसंख्या राष्ट्र के लिए विस्फोटकरी प्रतीत हो रही है। निरन्तर बढ़ती हुई जनसंख्या के कारण मानवों के लिए आवास, भोजन, शिक्षा, आजीविका आदि साधनों की व्यवस्था न केवल परिवार के लिए अपितु सरकार के लिए भी दु:साध्य हो गई है। किसी भी राष्ट्र के सुविकास के लिए उस की आर्थिक स्थिति एवं जनसख्ंया के बीच पूर्ण सन्तुलन आवश्यक है निर्बाध गति से बढ़ती हुई जनसंख्या राष्ट्र हित में बाधक है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# योगात् सुखमवाप्यते

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**11 दिसंबर 2014 इत्येतस्य दिनाङ्कस्यातिमहत्त्वमस्त्यस्मिन् काले योगशास्त्रे योगाभ्यासे च प्रवृत्तानां प्रवृत्त्युन्मुखानां तज्ज्ञानवतां केवलं जिज्ञासुजनानामुदासीनानां वा जनानां कृते, यतोहि दिवसेऽस्मिन्निर्णयो ह्येकःसञ्जातः संयुक्तराष्ट्र-महासभायाम्, तत्र हि 177 सङ्ख्यात्मकैः सदस्यराष्ट्रैरेकस्वरेण संस्वीकृतं योगस्य महत्त्वमुद्घोषितश्च 21 जून दिनाङ्क ''अन्तरराष्ट्रीय-योगदिवस'' इति। अध्यात्मक्षेत्रे विश्वस्य गुरुर्वर्तते भारतदेशः, अत्रत्याः हि ब्रह्मर्षयः देवर्षयः परमर्षयः महर्षयः काण्डर्षयः श्रुतर्षयः राजर्षयश्चैते सप्त-सङ्ख्यात्मकाः ऋषयः योगे परमप्रवीणा आसन्नध्यात्मे च निष्णातैरेतैरालोकितं जगत्सर्वम्। अधिकृत्य च कर्माण्येकविंशतिसङ्ख्यात्मकाः ह्यन्ये ये वैखानसाः वालखिल्यास्तथा चैतादृशाः ऋषय आसन् ते सर्व एव चित्तवृत्तिनिरोधात्मके योगे दक्षाः स्व-स्वकर्मणि निरताः विभिन्नैर्माध्यमैर्मोक्षात्मकं चरमं लक्ष्यमवापुः।**

इस समय में योगशास्त्र में, योगाभ्यास में प्रवृत्त लोगों के लिए अथवा योग की ओर प्रवृत्त होने के लिए तैयार लोगों के लिए, इस को जानने वाले योगियों के लिए और केवल जिज्ञासु लोगों के लिए अथवा उदासीन लोगों के लिए इस 11 दिसंबर 2014 के दिन का अत्यधिक महत्त्व है क्योंकि इस दिन एक निर्णय संयुक्त राष्ट्र महासभा में हुआ जिसमें 177 सदस्य राष्ट्रों के द्वारा एक स्वर से योग का महत्त्व स्वीकृत किया गया और दिनांक 21 जून को अंतरराष्ट्रीय योग दिवस के रूप में घोषित किया गया। अध्यात्म के क्षेत्र में भारतवर्ष विश्व का गुरु है यहाँ के ब्रह्मर्षि, देवर्षि, परमर्षि, महर्षि, काण्डर्षि, श्रुतर्षि और राजर्षि ये 7 संख्या वाले ऋषि योग में अत्यधिक प्रवीण थे और अध्यात्म में भी निष्णात इन ऋषियों के द्वारा सम्पूर्ण जगत् को आलोकित किया गया। कर्मों को अधिकृत करके प्रसिद्ध होने वाले एकविंशति संख्या वाले अन्य जो वैखानस, वालखिल्य इत्यादि इस तरह के ऋषि थे वे भी सभी चित्तवृत्ति के निरोधस्वरूपक योग में दक्ष थे और अपने अपने कर्मों में लगे हुए इन्होंने विभिन्न माध्यमों से मोक्षस्वरूप चरम लक्ष्य को प्राप्त किया।

**तस्य मोक्षस्योपलब्धिस्तु शुद्धसत्त्वं विना न भवति, सत्त्वस्य शुद्धत्वञ्च योगं विना न जायते। चतुर्विंशति-तत्त्वात्मके ह्यस्मिन् शरीरे तात्त्विकरूपेण मनसः संस्थितिर्वर्तते। आचार्यः सुश्रुतः सर्वभूता-नामुत्पत्तिक्रमे कथयति यत्-**

उस मोक्ष की उपलब्धि तो शुद्ध सत्त्व के विना नहीं होती है और सत्त्व की (मन की) शुद्धता तो योग के विना नहीं होती है। चतुर्विंशतितत्त्वात्मक इस शरीर में तात्त्विक रूप से (तत्त्व के रूप में) मन की स्थिति है। आचार्य सुश्रुत सभी प्राणियों के उत्पत्तिक्रम में कहते हैं कि-

**तस्मादव्यक्तान्महानुत्पद्यते तल्लिङ्गएव। लिङ्गाच्च-महतस्तल्लक्षण एवाहङ्कार उत्पद्यते, स त्रिविधो वैकारिकस्तैजसोभूतादिरिति। तत्र वैकारिका-दहङ्कारात्तैजससहायात्तल्लक्षणान्येवैका-दशेन्द्रियाण्यु-त्पद्यन्ते...... भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते-..; तेभ्यो भूतानि व्योमानिला-नलजलोर्व्यः; एवमेषा तत्त्वचतुर्विंशतिर्व्याख्याता।। सु.शा. 1/4।।**

उस अव्यक्त से उसी लक्षण वाला महान् उत्पन्न होता है, उस लक्षण वाले महान् से उसी लक्षण वाला अहङ्कार उत्पन्न होता है, वह अहङ्कार त्रिविध होता है- वैकारिक, तैजस और भूतादि। इसमें वैकारिक अहङ्कार से तैजस अहङ्कार की सहायता से उन्हीं लक्षणों वाली एकादश इन्द्रियाँ उत्पन्न होती हैं। भूतादि अहङ्कार से भी तैजस अहङ्कार की सहायता से

उन्हीं लक्षणों वाले पञ्चतन्मात्राएं उत्पन्न होती हैं। उन पञ्चतन्मात्राओं से आकाश वायु अग्नि जल एवं पृथ्वी इन भूतों की उत्पत्ति होती है। इस प्रकार से यह चतुर्विंशतितत्त्वों की व्याख्या हो गई है।

**स्पष्टयत्येतत्तु व्याख्याकारो डल्हणः- तान्य-हङ्कारादुत्पन्नान्यहङ्कारकारिकाणीति साङ्ख्ये, वैद्यके तु भौतिकानि। पूर्वर्णि पञ्चश्रोत्रादीनि बुद्धीन्द्रियाणि, बुद्धेराश्रयत्वात्; इतराणि-वाक्प्रभृतीनि कर्मेन्द्रियाणि, कर्मण आश्रयत्वा-त्तेषाम्; उभयात्मकं बुद्ध्यात्मकं कर्मात्मकं च मनः, बुद्धीन्द्रियाणां कर्मेन्द्रियाणां च मनोऽधिष्ठितानामेव प्रवृत्तेः।( डल्हणः )**

इसको व्याख्याकार डल्हण स्पष्ट करते हैं कि वह अहङ्कार से उत्पन्न अहङ्कार करने वाली इन्द्रियाँ सांख्य दर्शन में मानी गई हैं, वैद्यकशास्त्र में तो उन इन्द्रियों को भौतिक कहा गया है। इनमें पूर्व की पाँच श्रोत्रेन्द्रिय इत्यादि बुद्धि में इनका आश्रय होने के कारण बुद्धीन्द्रिय होती हैं। अन्य वागीन्द्रिय इत्यादि पाँच का कर्म में आश्रय होने के कारण कर्मेंद्रियाँ होती हैं। मन बुद्ध्यात्मक तथा कर्मात्मक होने के कारण उभयात्मक है। बुद्धन्द्रियों की और कर्मेन्द्रियों की प्रवृत्ति इन इन्द्रियों के मन से अधिष्ठित होने पर ही होती है अर्थात् जब मन अधिष्ठित होकर इनकी सहायता करता है तभी इन इन्द्रियों की प्रवृत्ति होती है।

**एतन्मनस्त्रिविधं कथितं दार्शनिकैरायुर्वेदज्ञैरपि, आयुर्वेदे हि यथा-शुद्धं, राजसं, तामसमिति। तद्धि शुद्धमदोषमाख्यातं कल्याणांशत्वात्, राजसं सदोषमाख्यातं रोषांशत्वात्, तामसमपि स- दोषमाख्यातं मोहांशत्वात्।**

दार्शनिकों के द्वारा एवं आयुर्वेदज्ञों के द्वारा भी यह मन तीन प्रकार का कहा गया है, जैसे कि आयुर्वेद में शुद्ध राजस और तामस। इनमें जो शुद्ध है वह कल्याणांश वाला होने के कारण दोष रहित कहा गया है, रोषांश वाला होने के कारण राजस को दोषसहित कहा गया है और मोहांश वाला होने के कारण तामस सत्त्व को भी दोष सहित कहा गया है।

श्रीमद्भगवद्गीतायामपि च प्रोक्तं, यथा-

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसंज्ञेन चानघ।।** (श्रीमद्भगवद्गीता 14/6)

**रजो रागात्मकं विद्धि.....** (श्रीमद्भगवद्गीता 14/7)

**तमस्त्वज्ञानजं विद्धि.....** (श्रीमद्भगवद्गीता 14/8)

श्रीमद्‌भगवत् गीता में भी कहा गया है, जैसे- हे अनघ ! (हे पापरहित अर्जुन ! (उन गुणों में सत्त्वगुण निर्मल होने के कारण प्रकाशक है, निर्विकार है तथा वह सुख की आसक्ति से एवं ज्ञान की आसक्ति से शरीरधारी को बाँधता है।

रजोगुण को रागात्मक समझो.........।

तमोगुण को अज्ञान से उत्पन्न होने वाला समझो.....।

**मनसि भक्तिः शीलं शौचं द्वेषः स्मृतिर्मोहस्त्यागो मात्सर्यं शौर्यं भयं क्रोधस्तन्द्रोत्साहस्तैक्ष्ण्यं मार्दवं गाम्भीर्यमनवस्थितत्वमित्येवमादयश्चान्ये च विकाराः भवन्ति, एते विकाराः यथास्वं हेतुमवाप्य समये समये प्रकटीभवन्ति राशिपुरुषे, तर्हि सः कदाचित् सुखं कदाचिच्च दुःखमनुभवति। तत्र यद्दुःखं तत्तु तदात्वे पारमार्थिकरूपे चापि दुःखमेव, किन्तु सुखं तु तदात्वे पारमार्थिके च भिन्नात्मकमेव।**

मन में भक्ति, शील, शौच, द्वेष, स्मृति, मोह, त्याग, मात्सर्य (ईर्ष्या), शौर्य, भय, क्रोध, तन्द्रा, उत्साह, तैक्ष्ण्य, मृदुता, गाम्भीर्य, अनवस्थितत्व (एक चिंतन या एक बात पर स्थिर नहीं रहना, चंचलत्व) इत्यादि तथा अन्य विकार होते हैं। ये विकार राशि पुरुष में अपने-अपने हेतु को प्राप्त कर समय-समय पर प्रकट होते रहते हैं। उनके द्वारा वह कभी सुख और कभी दुःख अनुभव करता है इसमें जो दुःख है वह तो तात्कालिक रूप से भी और पारमार्थिक रूप से भी दुःखी होता हैं किंतु पारमार्थिक रूप से दुःखी होता है किंतु सुख तो तात्कालिक रूप में और पारमार्थिक रूप से भिन्न स्वरूप का ही होता है।

**अत्र कथनीयमेतद्वर्तते यत् सुखं तु द्विविधम्- तदात्वे तु सुखसंज्ञकमारोग्यं भवति, किन्तु पारमार्थिकरूपेण सुखं तु मोक्षात्मकमेव। विषयेऽस्मिन् व्याख्या-कारश्चक्रपाणिः कथयति यत् संज्ञकग्रहणा-**

**त्परमार्थतोऽसुखमपि लोके सुखमिति-यद्व्यवह्रियते, तदिह गृह्यत इति दर्शयति; तेन, दिवारात्रि-भोजनावस्थादिजनितं धातुवैषम्यमुद्वेजक- विकाराकर्तृत्वेन सुखमिति व्यवह्रियते, तेन यो ह्यल्पः स नास्त्येवेति कृत्वाऽल्पेऽपि धातुवैषम्ये धातुसाम्य-व्यवहारः सिद्धो भवति; तथा संज्ञकग्रहणेन लौकिक- सुखं न परमार्थतः सुखमिति दर्शयति ( चक्रपाणिः )**

यहाँ यह कहने योग्य बात है कि सुख तो दो प्रकार का होता है- तात्कालिक रूप से होने वाला तो सुखसंज्ञक आरोग्य होता है किंतु पारमार्थिक रूप से सुख तो मोक्ष ही है, इस विषय में व्याख्याकार चक्रपाणि कहते हैं कि-

संज्ञकपद के ग्रहण से पारमार्थिकरूप से जो सुख नहीं है वह भी लोक में सुख ही है इस प्रकार से व्यवहृत किया जाता है, यह बताते हैं। इससे दिन, रात्रि, भोजन एवं अवस्थाइत्यादि से उत्पन्न धातुवैषम्य उत्प्रेरक रूप से विकार करने वाला नहीं होने के कारण सुख ही है, ऐसा व्यवहार किया गया है, उससे यह अभिप्राय है कि जो अल्प है वह नहीं है ऐसा मानकर ''अल्प भी धातुवैषम्य धातुसाम्य ही है'' ऐसा व्यवहारसिद्ध होता है तथा ''संज्ञक'' पद के ग्रहण करने से जो लौकिकसुख है वह पारमार्थिकरूप से सुख नहीं है, यह बताते हैं।

**समनस्कस्यात्मन आश्रयो ह्येषः कायश्चतुर्विंशतितत्त्वात्मकत्वेन एक एव किन्तु चिकित्सादृष्ट्या तु मनसः शरीरस्य च पृथक्त्वं विहितम्-**

**शरीरं सत्त्वसंज्ञं च व्याधीनामाश्रयो मतः ( च.सू. 1/55 ) एतेषां रोगाणां हेतुस्वरूपात्मकाः दोषाश्चापि पृथक् पृथक् रूपेण निर्दिष्टाः- वातपित्तकफास्तु शारीरदोषाः, मानसदोषौ तु रजस्तमसी एव, सत्त्वं तु प्रकाशकं वर्तते तथा तत्तु गुणात्मकत्वेन न रोगकारकम्। मानसास्तु रोगाः बहुविधाः किन्तु प्राथमिकरूपेण कामक्रोधलोभमान-मोहेर्ष्याहर्षा-मर्षादयश्च मानसाः विकाराः सन्ति। एते सतताभ्यासान्मानस-रोगानुत्पादयन्त्यत एव ज्ञान-विज्ञानधैर्यस्मृतिसमाधिभिः मानसविकाराणां नियन्त्रणं करणीयम्। अत्र ज्ञानम् अध्यात्मज्ञानं , विज्ञानं शास्त्रज्ञानं, धैर्यम् अनुन्नतिश्चेतसः, स्मृतिः अनुभूतार्थस्मरणं, समाधिः विषयेभ्यो निवर्त्यात्मनि मनसो नियमनम् इति ज्ञातव्यमस्ति।**

मनसहित आत्मा का यह आश्रय शरीर चतुर्विंशति-तत्त्वात्मकरूप से एक ही है किंतु चिकित्सा की दृष्टि से तो मन का और शरीर का पृथक्त्व कहा गया है। शरीर और सत्त्वसंज्ञक मन यह व्याधियों का आश्रय माना गया है। इन रोगों के हेतु स्वरूप दोष भी पृथक्पृथक् रूप से निर्दिष्ट किए गए हैं। वात, पित्त और कफ तो शारीरिक दोष हैं तथा मानसिक दोष तो रजस् और तमस ही हैं, सत्त्वगुण तो प्रकाशक है, वह तो गुणात्मक स्वरूप वाला होने के कारण रोग कारक नहीं होता है। मानस रोग तो अनेक प्रकार के होते हैं किंतु प्राथमिक रूप से काम, क्रोध, लोभ, मान, मोह, ईर्ष्या, हर्ष, अमर्ष (असहिष्णुता) इत्यादि मानसिक विकार हैं। ये निरंतर अभ्यास से मानस रोगों को उत्पन्न करते हैं, इसलिए ज्ञान, विज्ञान, धैर्य, स्मृति और समाधि के द्वारा मानस विकारों का नियन्त्रण करके आत्मा में उसका नियमन कर लिया जाए यह समाधि होती है, यह सब जानने योग्य है।

**ज्ञानादीनामभ्यासेन मनसः नियन्त्रणं पूर्णरूपेण भवति, अभ्यासस्तु योगेनैव सम्भवः। अत एव नियमितरूपेण नियतः योगाभ्यासः करणीय एव। योगदिवसस्त्वेकस्मिन्नेव दिवसे समायोजनीयः, स तु प्रेरणार्थक एव, ज्ञानविज्ञानधैर्यस्मृतिसमाधीनां सम्प्राप्तिस्तु नियमितेनैवाभ्यासेन भवति, तेन हि शुद्धं सत्त्वमवाप्यते। शुद्धस्य सत्त्वस्यावाप्त्यनन्तरमेव प्रशस्तो भवति मोक्षमार्गः, यत्र हि सर्वासां वेदनानां निवृत्तिर्भवति।**

ज्ञान इत्यादि के अभ्यास से मन का नियन्त्रण पूर्ण रूप से हो जाता है लेकिन इसका अभ्यास तो योग से ही संभव है, इसलिए नियमित रूप से नियत योगाभ्यास करना ही चाहिए। योगदिवस तो एक ही दिन में आयोजित करने योग्य है, लेकिन वह प्रेरण करने के लिए है, ज्ञान, विज्ञान, धैर्य, स्मृति और समाधि इत्यादि की प्राप्ति तो नियमित अभ्यास से ही होती है। इससे शुद्ध सत्त्व की प्राप्ति की जाती है। शुद्ध सत्त्व की

प्राप्ति के बाद ही मोक्ष का मार्ग प्रशस्त होता है, जहाँ पर सम्पूर्ण वेदनाओं की निवृत्ति हो जाती है।

**आयुर्वेदीयदर्शनस्यैतद्वैशिष्ट्यमस्ति यदत्र चतुर्विंशतितत्त्वात्मकस्यास्य शरीरस्य दर्शनानुमतं वर्णनङ्कृत्वा दर्शनविषयेष्वपि चिकित्सात्मकं लक्ष्यमेव दृश्यते। अतएव चतुर्विंशतितत्त्वात्मकेऽप्यस्मिन् शरीरे षड्धात्वात्मक एव पुरुष आयुर्वेदे प्राधान्येन संस्वीकृतः। आचार्यश्चरकः कथयति यत्-**

**खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः।**

आयुर्वेदीय दर्शन का यह वैशिष्ट्य है कि यहाँ चतुर्विंशतितत्त्वात्मक इस शरीर का दर्शनों के अनुसार वर्णन करके षड्धात्वात्मकपुरुष ही आयुर्वेद में प्रधान रूप से स्वीकृत किया गया है, आचार्य चरक कहते हैं कि- ख आदि पांच( आकश, वायु, अग्नि, जल, पृथ्वी) तथा छठी चेतना धातु इन्हें पुरुष कहा गया है।

**अत्र चेतनाशब्देन चेतनाधारः समनस्क आत्मा गृह्यते; खादिग्रहणेन चेन्द्रियाणि खादिमयान्येव संस्वीकृतानि। अयं च वैशेषिकदर्शनपरिगृहीतश्चि-कित्साशास्त्रविषयः पुरुषः। आचार्यः सुश्रुतोऽप्यु-द्घोषयति यत् चिकित्सायान्तु पञ्चभूतातिरिक्तस्य कस्यापि तत्त्वस्य चिन्तनमपेक्षितं नास्ति, सः कथयति यत्-अयं पञ्चमहाभूतशरीरिसमवायः पुरुष एव कर्मपुरुषस्तथा स एव चिकित्साधिकृतो वर्तते, तदतिरिक्तस्य तु कस्याप्यत्र चिन्तनं चिकित्सार्थन्तु करणीयमेव न वर्तते, यथा हि-**

यहाँ चेतना शब्द से चेतना का आधार मन सहित आत्मा का ग्रहण किया गया है खादि के ग्रहण करने से ख आदि पंचमहाभूतों से युक्त इन्द्रियाँ ही स्वीकृत की गई हैं, यह वैशेषिक दर्शन के द्वारा गृहीत किया गया पुरुष चिकित्सा शास्त्र का विषय है। आचार्य सुश्रुत भी कहते हैं कि चिकित्सा में तो पंचमहाभूत के अतिरिक्त किसी भी तत्त्व का चिंतन अपेक्षित नहीं है वह कहते हैं कि यह पंचमहाभूत और आत्मा के समुदाय वाला पुरुष ही कर्म पुरुष है तथा वही चिकित्सा में अधिकृत है अर्थात् इसी की चिकित्सा की जाती है इसके अतिरिक्त तो किसी का भी चिंतन चिकित्सा के लिए करने योग्य नहीं है जैसे कि-

**भूतेभ्यो हि परं यस्मान्नास्ति चिन्ता चिकित्सिते। यतो हि तैराकाशादिभिर्भूतैः, तल्लक्षणोऽर्थात्भूतलक्षण-समस्तः स्थावरजङ्गमात्मकः भूतग्रामः विविधो जनितः। तस्य पञ्चमहाभूतारब्धस्य भूतग्रामस्य परस्परोपकायो-परकारकत्वेन व्यवस्थित स्य प्रयोजनं चिकित्सां प्रति लक्षीकृत्य अभिहितम्। यतो हि शास्त्रेऽस्मिन् पञ्चमहाभूतारब्धभूतग्रामेभ्यः परंपरं यदव्यक्तादि तत्र चिकित्सिते चिन्ता नास्ति। अव्यक्तादीनां विषये दर्शनशास्त्रेष्वेव चिन्तनमपेक्षितं चिकित्साशास्त्रे त्वनपेक्षितं तत्। यदा हि दर्शनमधि-कृत्य किञ्चिदपि विचारितं तदा त्वायुर्वेदीय-दर्शनानुमतः विचार-स्त्वायुर्वेदीयैः महर्षिभिरपि प्रकटित एव। यथा-**

आकाश आदि महाभूतों से अतिरिक्त चिकित्सा में अन्य किसी की चिंता नहीं है। क्योंकि उन आकाशादि महाभूतों के द्वारा उन लक्षणों अर्थात् महाभूतों के लक्षणों वाला समस्त स्थावर-जंगमस्वपक प्राणियों का विविध प्रकार का समूह उत्पन्न हुआ है। उस पंचमहाभूतों से उत्पन्न (प्रारंभ) व्यवस्थित भूतसमूह का परस्पर उपकारी और उपकारकत्व रूप में प्रयोजन चिकित्सा को लक्ष्य करके कहा गया है, क्योंकि इस शास्त्र में पंचमहाभूत से प्रारंभ प्राणियों के समूह के अतिरिक्त जो पर स्वरूप अव्यक्त इत्यादि हैं वहाँ उनकी चिकित्सा करने में चिंता नहीं रहती है अर्थात् अव्यक्त इत्यादि की चिकित्सा नहीं हैं। अव्यक्त इत्यादि के विषय में दर्शनशास्त्रों में ही चिंतन अपेक्षित है, चिकित्सा शास्त्र में तो वह अपेक्षित नहीं है। जब दर्शनस्वरूप को अधिकृत करके कुछ भी विचार किया गया है तब तो आयुर्वेदीय दर्शन की दृष्टि से भी आयुर्वेद के महर्षियों के द्वारा भी विचार प्रकट किया ही गया है, जैसे-

**तस्मिंश्चरमसन्न्यासे समूलाः सर्ववेदनाः।**
**स सञ्ज्ञाज्ञानविज्ञानानिवृत्तिं यान्त्यशेषतः।।**

च.शा. 1/154।।

उस चरम संन्यास के प्राप्त होने पर अर्थात् बाद में होने वाले सारे कर्मों का परित्याग हो जाने पर (सांसारिक विषयों से पूर्णरूपेण विरक्ति हो जाने पर) कारण सहित सभी वेदनाओं तथा ज्ञान (निर्विकल्पक एवं सविकल्पक ज्ञान) और विज्ञान (शास्त्रज्ञान) ये सभी विशेष रूप से अर्थात् सम्पूर्ण रूप से निवृत्ति को प्राप्त हो जाते हैं।

**अतएव पारमार्थिकं सुखं तु मोक्ष एव विहितः, प्रसङ्गेऽस्मिन्नुल्लेखनीयमेतदस्ति यदात्यन्तिक-शरीराद्युच्छेद एव मोक्षः, तस्य प्राप्तिस्तु शुद्धसत्त्व-समाधानाद्भवति, अर्थात् कारणवत्सर्वमुत्पद्यमानं बुद्ध्यहङ्कारशरीरादय एव दुःखहेतवः। आत्मव्यति-रिक्तानि तु बुद्ध्यहङ्कारादीनि तत्त्वानि परमार्थतः दुःखात्मकान्येव सन्ति, आत्मा त्वत्रोदासीनत्वेन संयुक्तः निर्विकार एव, द्रष्टा पश्यति हि क्रिया इति। द्रष्टा साक्षी, तेन यतिर्यथा परमशान्तः साक्षी सञ्जगतः क्रियाः सर्वाः पश्यन्न रागद्वेषादिना युज्यते, तथाऽऽत्माऽपि सुखदुःखाद्युपलभमानोऽपि न रागादिना युज्यते; दृश्यमानरागादिविकारस्तु मनसि।**

इसलिए पारमार्थिक सुख तो मोक्ष में ही कहा गया है। इस प्रसङ्ग में उल्लेखनीय है कि आत्यन्तिक अर्थात् स्थाई रूप से शरीर आदि का उन्मूलन ही मोक्ष है, उसकी प्राप्ति तो शुद्ध सत्त्व अर्थात् रजोगुण एवं तमोगुण से रहित मन के समाधान अर्थात् आत्मा में उस मन के संस्थित कर लेने पर होती है अर्थात् कारण वाले (उत्पन्न होते हुए होने वाले) सभी बुद्धि, अहङ्कार, शरीर इत्यादि ही दुःख के हेतु हैं। आत्मा के अतिरिक्त तो बुद्धि अहङ्कार इत्यादि तत्त्व पारमार्थिकरूप से दुःखात्मक ही हैं, आत्मा तो यहाँ उदासीन भाव से संयुक्त है और वह निर्विकार ही है वह द्रष्टा रहते हुए क्रियाओं को देखता है। द्रष्टा साक्षी होता हे, उससे जिस प्रकार से परम साक्षी स्वरूप में रहता हुआ (सम्पूर्ण क्रियाओं को देखता हुआ)भी राग-द्वेष इत्यादि से संयुक्त नहीं होता है, उसी प्रकार से आत्मा भी (चतुर्विंशतितत्त्वात्मक शरीर में) सुख-दुःख इत्यादि प्राप्त करने हेतु भी (वह आत्मा) राग इत्यादि से संयुक्त नहीं होता है, दिखाई देते हुए राग इत्यादि विकार तो मन में होते हैं।

**साङ्ख्यमते च मनः शब्देन बुद्धिरन्तःकरणं च गृह्यते। अत एवैतत्सर्वमात्मकृतं नास्त्येतादृशी सत्या बुद्धिर्यदोत्पद्यते तदैव पारमार्थिकं ज्ञानं भवति, तदैव क्रियासंन्यासं प्रति प्रवृत्तिर्भवति तथा तत्त्वज्ञानेन तेन वशित्वं जायते। वशी सन्नयमात्मा मनसः नियन्त्रणं करोति। तदनन्तरमेव वशी सन्नयमात्मा मोक्षार्थं प्रवृत्तः सर्वारम्भं शुभाशुभफलं त्यजति। एतदेव पारमार्थिकं सुखम्। पारमार्थिकस्य सुखस्यावाप्तिस्तु मोक्षेणैव भवति, यथा-**

**योगे मोक्षे च सर्वासां वेदनानामवर्तनम्।**
**मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रवर्तकः।।137।।**

**अत एव प्राथमिकरूपेण सुखसंज्ञकात्मकस्या-रोग्यस्य प्राप्त्यर्थमनुबन्धरूपेण च पारमार्थिकस्य सुखस्य प्राप्त्यर्थं योगाभ्यासः करणीयः।**

साङ्ख्यमत में तो मन शब्द से बुद्धि और अंतः करण का ग्रहण किया जाता है, इसलिए यह सब आत्मा के द्वारा किया हुआ नहीं है, इस प्रकार की सत्या बुद्धि जब उत्पन्न होती है तभी पारमार्थिक ज्ञान होता है और तभी क्रिया संन्यास के प्रति प्रवृत्ति होती है तथा उस तत्त्व ज्ञान से वशित्व उत्पन्न हो जाता है। वशी स्वरूप में रहता हुआ यह आत्मा मन का नियन्त्रण करता है, उसके बाद ही वशीस्वरूप में रहता हुआ यह आत्मा मोक्ष के लिए प्रवृत्त हुआ सर्व आरंभक सम्पूर्ण क्रियाओं के द्वारा किए जाने वाले शुभ और अशुभ फल का त्याग कर देता है, यही पारमार्थिक सुख है। पारमार्थिक सुख की प्राप्ति तो मोक्ष से ही होती है, जैसा कि कहा गया है-

योग और मोक्ष में तो सम्पूर्ण वेदनाओं की निवृत्ति होती है, मोक्ष में तो निश्चित रूप से (वेदनाओं की) निवृत्ति होती है तथा योग मोक्ष का प्रवर्तक है।

इसलिए प्राथमिक रूप से सुखसंज्ञक स्वरूप के आरोग्य की प्राप्ति के लिए और अनुबंध रूप से पारमार्थिक सुख की प्राप्ति के लिए योग का अभ्यास करना चाहिए।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

## छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**

(English) Weekly
**ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–३०२००१ • दूरभाषः ०१४१–२३७९०१४

प्रतिष्ठायाम्,